लोकप्रियसाहित्यग्रन्थमाला-३७

महाकविभोलानाथविरचितं

# श्रीकृष्णलीलामृतम्

( पूर्णेन्दुसंस्कृतटीकोपेतं सम्पादनं भाषार्थश्च )

सम्पादकः, टीकाकारः
भाषानुवादकश्च
**डॉ. पूर्णचन्द्र उपाध्यायः**

**राष्ट्रियसंस्कृतसंस्थानम्**
**मानितविश्वविद्यालयः**
**नवदेहली**

प्रकाशकः
कुलसचिवः
**राष्ट्रियसंस्कृतसंस्थानम्**
५६-५७, इंस्टीट्यूशनल एरिया
जनकपुरी, नवदेहली-११००५८

e-mail : rsks@nda.vsnl.net.in
website : www.sanskrit.nic.in

© राष्ट्रियसंस्कृतसंस्थानम्

ISBN : 978-93-86111-81-4

प्रथम संस्करण : २०१२

मूल्यम् : ₹ 90/-

मुद्रकः
सेट पैकेजिंग, दिल्ली-55

# भूमिका

साम्प्रतिकोऽयं समयो वर्तते संस्कृतविद्यानुशीलने नवोन्मेषस्य नूतनसम्भावनानां च। उदीयमाना युवानो विद्वांसः न केवलं पाण्डित्येन प्रथयन्ति शास्त्रपरम्पराः, क्वचित्पुरातनग्रन्थागारेभ्योऽज्ञातप्राया दुर्लभा पुरातन्यो मातृका उद्धृत्य तासां पाठालोचनपुरस्सरं नवीनसंस्करणादिसम्पादनेनापि तेजस्विनीं स्वकीयामधीतिं ते विदधति इति शक्यं सपरितोषमुच्छ्वसितुम्।

आदशमशतकात् आसाम्प्रतिकाच्च शतकात् संस्कृतसाहित्यरचना-परम्परा नव्यभारतीयभाषाणां सम्पर्कमवाप्य नवीनां प्रवृत्तीः श्रयति। तेन लोकभाषाया च्छन्दांसि भावच्छटा च तस्यां विच्छुरिता। इयं प्रक्रिया महाकविजयदेवविरचितगीतगोविन्दात् प्रारब्धा क्वचित् पण्डितराजे जगन्नाथे क्वचित् विश्वेश्वरपाण्डेप्रभृतिषु तथैव च बहुषु विंशशतकभवेषु महाकविषु विजृम्भते। एतादृशेषु कविषु उल्लेखमर्हति श्रीभोलानाथः। अष्टादशशतकभवः संस्कृत-हिन्दी-पञ्जाबीभाषासाधारणम् असाधारणं रचनाकौशलं वितन्वानोऽयं कविर्भोलानाथः नातिप्रसिद्धोऽपि सिद्धसरस्वतीप्रसाद इति सर्वथा स्मरणीयः। एतस्य कर्णकुतूहलं नाम संस्कृतरूपकं विज्ञायत एव। परं हृद्यनिरवद्यपद्यसंवलितं अमन्दसौन्दर्यनिधानभूतमपि श्रीकृष्णलीलामृतं नाम काव्यमस्य न तथा प्रथां गतम्। एतस्य काव्यस्य समुद्धारं कृतवान् संस्कृतटीकाभाषानुवादसंवलितेन नवीनेन पाठालोचनसहितेन संस्करणेन सुधीः पूर्णचन्द्रोपाध्याय इति स सर्वथा साधुवादार्हः।

अस्मिन् काव्ये कृष्णचरितं विषयीकृतम्। मुगलकालभवेन कविना कृष्णस्य कालियदमनवर्णनव्याजेन लोकोद्धारकमपि रूपं प्रकटीकृतम्, तथैव लोकोत्तरसौन्दर्यवैशद्यमपि विभावितम्। स्वच्छन्दं विविधच्छन्दसां वरणं विहितवती कवेर्लेखनी अस्मिन् काव्ये। अलङ्काराणाम् अनुपमा सुषमा,

सौशब्द्यम्, अर्थगौरवम् चैतत्काव्यं विशेषयन्ति भक्तिभावना च समग्रयति अस्य रागात्मकताम्। विशिष्य च उपमया उत्प्रेक्षाया: भाविकस्य चोदात्तेनालङ्कारेणात्र मणिकाञ्चनयोगो जात:।

कविर्भोलानाथो रसालयम् आलयं भागवतरसं निपीतवानिति न संशीति:। अथ च विद्यावतां भागवते परीक्षेति विद्वदुपज्ञाया: सूक्ते: वेदान्तादिशास्त्रेष्वपि स अबाह्य:। सप्तमे पद्ये ब्रह्मसूत्रं भागवतं च स युगपत् स्मारयति–

**जन्माद्यस्य यत: सतां सुकृतिनां स्वर्गापवर्गौ यतो**
**यत्सेतुर्जगतां भवेद् यदखिलं ब्रह्मेति निष्कर्षत:।**
**भक्तानां हितहेतवे यदभवत् पूर्णेन्दुबिम्बानन:।**
**कृष्ण: सत्यमनन्तमद्वयमसौ चित्ते स्थिरीभूयताम्।।**

अस्य काव्यस्य प्रकाशनेन अद्यापि अनवद्य: सुरसरस्वत्या: साहित्यभाण्डागार: निरवधिर्वरीवर्त्यतेऽस्या: शेवधिरिति पुनरपि प्रत्ययो दृढीक्रियेतेति मन्यामहे, श्रीकृष्णलीलामृतं काव्यं च रसिकेभ्य उपहरन्तो मुदमनुभवाम:।

**—राधावल्लभ: त्रिपाठी**
कुलपति:
राष्ट्रियसंस्कृतसंस्थानम्

# अथोपोद्घातः

**नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम्।**
**नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति।।** (मम्मटः)

आवैदिककालादारभ्य अत्याधुनिकं कालं नाम इदानीन्तनं यावत्सुरवाग्वध्वाः सुदीर्घेयं काचिन्नृत्यमयी यात्रा निरवच्छिन्ननिरन्तरप्रसरणशीला। अपूर्वलावण्यवत्याः सकलसहृदयहृदयग्राहिण्याः सुरवाग्देवताया अस्याः सुदीर्घायामस्यां यात्रायां नैकानि प्रकाराणि हृदयावर्जकानि तत्स्वरूपकाणि सरसहृदयैः काव्यसुधालोलुपैः प्रत्यक्षीकृतानि प्रत्यक्षीक्रियन्ते च। तदेतस्याः बहुविधस्वरूपप्रकारेष्वन्यतमं भवति श्रव्यकाव्यविधान्तर्गतं गीतिकाव्यम्। यत्खलु खण्डकाव्यं, दूतकाव्यं, संदेशकाव्यं, स्तोत्रकाव्यं, शतककाव्यं चेत्यादिभिः नामभिः बहुधा व्यपदिश्यते।

तदत्र नो लक्ष्यभूतं यत्स्तोत्रकाव्यं, भक्तिकाव्यं, शतककाव्यं वा, तत्तु महाकविश्रीभोलानाथविरचितं श्रीकृष्णलीलामृतमित्याख्यं सकलसामाजिकचेतोऽनुकूलकमन्यतमम्। तदिदं श्रीकृष्णलीलामृतं काव्यं तद्विरचितेन ''कर्णकुतूहलम्'' इत्याख्येन नाटकेन साकमेव एकेनैव ग्रन्थाकारेण पुरातत्त्वाचार्याणां श्रीमतां जिनविजयमुनीनां प्रधानसम्पादकत्वे श्रीमतां गोपालनारायणबहुरामहोदयानां सम्पादकत्वे च राजस्थानपुरातत्त्वान्वेषणमन्दिरस्य तत्त्वावधाने यद्यपि 1957 तमे ख्रिस्ताब्दे प्रकाश्यतामधिगतम्, परन्तु इदानीं यावत्काव्यस्यास्य मूलपाठमतिरिच्य न काऽपि टीका व्याख्या वा कृता न च कश्चन भाषानुवादः कृतः केनचिदिति हेतोः काव्यमेतन्न सर्वेषां विदुषां गोचरीभूतम्। कतिचिद्वर्षेभ्यः पूर्वं जोधपुरावस्थितराजस्थानपुरातत्त्वान्वेषणमन्दिरस्य परिदर्शनावसरे प्रकाशितमात्रं पुस्तकमिदं मदीयं हस्तगतं जातम्। पुस्तकेऽस्मिन् लब्धसत्ताकं काव्यमिदं यथा सकलसुरभारतीसमुपासकानां रसास्वादनयोग्यत्वमाप्नुयात्तथा कश्चन सुदृढः प्रयासः करणीय इति धिया मया हिन्दीभाषार्थेन सह यथाशक्ति लघीयसी काचित्संस्कृतटीका पूर्णेन्दुनामधेया

संरचिता। यथाऽवसरं पुनस्सम्पादनमपि विहितम्। आशासे मन्दमतिना मया नवकलेवरत्वेन प्रस्तुतमिदं पूर्णेन्दुटीकोपेतं काव्यं सकलसहृदयसामाजिकचेतः प्रसादनाय अलं स्यादिति। सेयं संस्कृतटीकासंरचनात्मकप्रेरणा विद्यार्थिजीवन एव शोधकार्यच्छलेन प्रातःस्मरणीयेभ्यो मद्गुरुपादेभ्यः सम्प्रति राष्ट्रियसंस्कृत-संस्थानस्य कुलपतिपदमलंकुर्वद्भ्यः श्रीमद्भ्य आचार्यराधावल्लभत्रिपाठिवर्येभ्यः सम्प्राप्त इति कृत्वा ग्रन्थस्यास्य निर्विघ्नपरिसमाप्तिकामनया च तच्चरणयोः प्रणतिपुरस्सरमाधमर्ण्यं व्याहरामि।

काव्यस्यास्य श्रीकृष्णलीलामृतस्य रचयितुः महाकवेः श्रीभोलानाथस्य जीवनवृत्तं तत्कृतिजातञ्च प्रथमं तावद्विवेचनीयमिति कृत्वा तदेव प्रथमं प्रतिपाद्यतेऽस्माभिः।

**काव्यकर्तुः परिचयः**- अन्तःसाक्ष्यमित्युक्ते महाकविभोलानाथविरचित-विविधभाषावलम्बिकाव्यजातमवलम्ब्यैव अपि च तत्पौत्रश्रीचैनरामविरचितर-ससमुद्राख्यं ग्रन्थमाश्रित्य काव्यकर्त्तुरस्य विशदः परिचयः सुस्पष्टमेव प्रामाण्यते। हिन्दीसंस्कृतयोः सुकवेरस्य कान्यकुब्जविप्रस्य जनिता श्रीनन्दरामशुक्लः संस्कृतसाहित्ये प्रकाण्डः विद्वान् आसीत्। सोऽयं नन्दरामशुक्लः गङ्गायमुनयोः मध्यभागेऽवस्थिते देवकुलीपुरनाम्नि स्थाने निवसति स्म। तदस्य पूर्वजः नाम प्रथमवंशपुरुषः श्रीरामशुक्लः आसीत्। तदस्य पूर्वजस्य श्रीरामशुक्लस्योल्लेखः कविना भोलानाथेन ''नाम्ना श्रीरामशर्मा...'' इत्याख्ये श्रीकृष्णलीलामृतान्विते द्वितीय एव पद्ये कृतः। सोऽयं श्रीरामशर्मा प्रतापशाली सुयोद्धा आसीत्। कदाचित्कस्यचिच्छरणागतस्य वीरस्यानेन संरक्षणं कृतम्। येन प्रसन्नचेतसा तत्कालीनमुगलशासकेन असौ ''ठाकुर'' इत्युपाधिनाऽलंकृतः। तदस्यां श्रीरामठाकुरसन्ततिपरम्परायां श्रीदुर्गालालशुक्लनामधेयः कश्चन पुराणविद्विप्रः जनिं लेभे। यः खलु नन्दरामस्य पितामहः भोलानाथस्य प्रपितामहश्चासीत्। श्रीदुर्गालालस्य पुत्रः नन्दरामस्य पिता च श्रीभूपतिशुक्लोऽपि गुणवान् नीतिशास्त्रज्ञः आसीत्। सोऽयं भूपतिः देवलीपुरतः आगरामागत्य तत्र वसतिं चकार। तस्य भूपतिशुक्लस्य पुत्रः नन्दरामः, नन्दरामस्य च पुत्रः भोलानाथ एव । कवेरस्य भोलानाथस्य व्याकरणसाहित्यशास्त्रयोरगाधपाण्डित्यमासीत्। तत्कालीन-

मुगलसम्राज्ञा गुणग्राहिणा बादशाहशाहजहांद्वितीयेन सह श्रीभोलानाथस्य सुसम्पर्क: आसीत्। तेनाऽसौ राजसभायां सुसम्मानित: सत्कृतश्च। परन्तु कविरयं भोलानाथ: तत्र राजदरवारे तुष्टिं नैवाप। ततोऽसौ भरतपुरस्य राज्ञा सूर्यमल्लेन आमन्त्रित: सन् तत्राजगाम। तत्रत्यराजवंशेन साकमपि भोलानाथस्य सुसम्बन्ध: संजात:। येन नवलसिंहादीनां तत्रत्यभूपतीनां प्रीतये तेन बहूनि काव्यरत्नानि रचितानि। परन्तु तत्राऽप्यसौ स्थायिरूपेण नैव न्यवसत्। तत: पुन: जयपुरं समाययौ। तदानीं माधवसिंहजीप्रथम एव जयपुरस्य राजसिंहासनमलंकरोति स्म। तस्य गुरु: प्रमुखपरामर्शदाता च भट्टसदाशिव आसीत्। श्रीभोलानाथस्यात्र सभाकवित्वे श्रीभट्टसदाशिवस्य महत्त्वपूर्णभूमिकाऽसीत्।

एतदर्थमेव श्रीभट्टसदाशिवस्य राजकुमारस्य प्रतापसिंहस्य (माधवसिंहस्यापत्यस्य) च प्रीतये प्रशस्तिपूर्वकं कर्णकुतूहलमित्याख्यं नाट्यरत्नं भोलानाथेन व्यरचि।

कवे: श्रीभोलानाथस्य वंशवृक्ष: सहृदयपाठकसौकर्याय एवं निरूप्यते।

श्रीरामशुक्ल: (आदिपुरुष:)
↓
दुर्गादास:
↓
भूपति:
↓
नन्दराम:
↓
भोलानाथ: (महाकवि:)
↓
शिवदास:
↓
चैनराम:

**कालनिरूपणम्ः**– उपर्युक्तविवेचनेन तथ्यमिदं स्पष्टतामुपयाति यत् कविः श्रीभोलानाथः सम्राज्ञा शाहजहांद्वितीयेन सह सुपरिचितः आसीत्। अपि च श्रीमाधवसिंहस्य शासनकाल एव जयपुरं प्रति समाययौ। तथा च 1840 तमे वि. सम्वत्सरेऽसौ महाराजेन प्रतापसिंहेन ''महाकविः'' इत्युपाधिना विभूषितः। वि0 सम्वत्सरः 1840 इत्युक्ते 1783 तमः खिस्ताब्दः। शाहजहांद्वितीयस्तु 1801 तमे वि0 सम्वत्सरे इत्युक्ते 1745 तमे खिस्ताब्दे देहल्याः राजसिहांसनमारुरोह। 1849 तमे वि.सम्बत्सरे इत्युक्ते 1792 तमे खिस्ताब्दे एव महाकवेः श्रीभोलानाथस्य दिव्यात्मा परमात्मनि विलीनोऽभूत्। तदेवं श्री भोलानाथस्य कालः अष्टादशशताब्द्याः पूर्वार्धादारभ्य उत्तरार्धं यावन्निश्चीयते।

**कर्तृत्वं पाण्डित्यञ्चः**– महाकविविरुदविभूषितेन श्रीभोलानाथेन ब्रजभाषया, पंजाबीभाषया, संस्कृतगिरा चेत्यादिभिः तत्कालीनप्रचलितप्रमुखभाषाभिः मनोहराणि कृतिरत्नानि सुगुम्फितानि। तेषामुपलब्धानां ग्रन्थानां सूची अत्र नाममात्रं प्रस्तूयतेः–

**✶ संस्कृतरचनाः –**

1. श्रीकृष्णलीलामृतम् (कृष्णभक्तिपरकं श्रीमद्भागवतकथात्मकं काव्यम्)
2. कर्णकुतूहलम् (राजस्तुतिपरकं नाटकम्)

**✶ हिन्दी रचनाः –**

1. नखशिखभाषा (शृङ्गारिकः ग्रन्थः)
2. नवलानुराग (नीतिप्रशस्तिपरकः ग्रन्थः)
3. युगलविलास (शृङ्गारात्मकः ग्रन्थः)
4. लीला पच्चीसी (विविधविषयात्मकानां 107 संख्यकपद्यानां संग्रहः)
5. भगवद्गीता (केवलं 13 अध्यायानामनुवादः)
6. नैषध (प्रथमसर्गमात्रस्यानुवादः)

7. सुमन प्रकाश (नायिकाभेद) (आलंकारिक: ग्रन्थ:)

8. महाभारत का पद्यानुवाद (केवलं भीष्मपर्व)

9. श्रीमद्भागवत महापुराण (दशमस्कन्धस्य पद्यानुवाद:)

10. लीला प्रकाश (विविधविषयोपेतपद्यात्मक:)

11. प्रेम पच्चीसी (शृङ्गारात्मक:)

✶ **ब्रजभाषान्वितरचना:** –

1. सुखनिवास (गीतगोविन्दस्य पद्यानुवाद:)

2. नायिका भेद (आलंकारिक: ग्रन्थ:)

✶ **पंजाबीभाषान्वितरचना:** –

1. इश्कलता (शृङ्गारात्मक:)

एतासूपर्युक्तरचनासु प्रतिफलति महाकवे: भोलानाथस्यासाधारण-कवित्वप्रातिभ्यं पाण्डित्यञ्च। प्रसादगुणोपेता, वैदर्भीरीतिसंघटिता कवेरस्य कोमलकान्तपदावली स्वत एव कर्षति सचेतसां चेतांसि। कोमलकान्तपदावल्या: दिङ्मात्रमुदाहरणं यथा–

**''कमलालयकमलास्यं कमलाय कमलनाभमहम् ।**
**गिरिगोवर्धननाथं वन्दे कृष्णं गवां नाथम् ।।''**

(श्रीकृष्णलीला...63)

वर्णसाम्यात्मकस्य रसानुगुणितस्य अनुप्रासस्याप्यत्र रमणीयं संविधानम्। ''कविरनुहरतिच्छायाम्'' इति सूक्त्यनुसारं कविकुलगुरो: कालिदासस्य कविताकामिनीमप्यनुकरोति भोलानाथस्य काव्यललना। दिङ्मात्रं यथा–

**''अहं प्रवृत्तोऽस्मि च तस्य वर्णने।**
**मदीयवाचो हसनं भविष्यति''** ।। (श्रीकृष्णलीला...05)

भोलानाथस्य पद्यांशोऽयं निम्नाङ्कितां कालिदासविरचितरघुवंशीय-काव्यच्छायामनुकरोति ।

**''मन्दः कवियशःप्रार्थी गमिष्याम्युपहास्यताम्''** **इति ।**

उपमालंकाररस्य संविधाने तु कविरसौ प्रकटयति स्वकीयामनुपमां कवित्वप्रतिभाम्। तद्यथा-

**''मध्यगोऽभूद्धरिः साक्षाद् हेम्नां नीलमणिर्यथा''** ।

(श्रीकृष्णलीला...91)

पद्यांशेऽस्मिन्नुपमालंकारेण सह उत्प्रेक्षालंकारोऽपि लीलया संयोजितः। वेदान्तादिदर्शने तु कवेरस्य पाण्डित्यमप्रतिहतत्वमाधत्ते। तद्यथा-

**''त्वमेव जगतामीशः प्रभुस्त्वत्तः परं नहि।**
**सर्वं खल्विदं ब्रह्म त्वमेवासि जगद्गुरो।।''**

(श्रीकृष्णलीला...76)

**काव्यस्यास्य प्रतिपाद्यम्** - श्रीकृष्णलीलामृतेऽस्मिन्भक्तिकाव्ये 104 संख्यकैः पद्यैः भगवतः श्रीकृष्णस्य लीलात्मकं चरितं सरसं वर्णितम्। यत्खलु श्रीमद्भागवतमहापुराणस्य दशमस्कन्धान्वितं विषयवस्तु अवलम्ब्य प्रवृत्तम्।

तदेवं गीर्वाणवाणीसारस्वतसाधकेषु महाकविषु श्रीभोलानाथ इदानीं यावदप्रसिद्ध एव आसीत्। यद्यपि कैश्चिन्नाममात्रेणैव कविरसौ ज्ञातः, परन्तु कवेः काव्यान्तर्निहितं कवित्वप्रातिभ्यं केनापि नैव परिलक्षितम्। सम्प्रति श्रीकृष्णलीलामृतस्य संस्कृतटीकया सह भाषानुवादेन कवेः प्रातिभ्यं सकलसहृदयगोचरीभूतं जातमिति काव्यस्यास्य सार्थकत्वं मच्छ्रमस्यापि इति नो मतिः।

काव्यमिदं नवदेहलीस्थमानितविश्वविद्यालयस्य राष्ट्रियसंस्कृत-संस्थानस्यार्थिकसहयोगेन प्रकाश्यतामुपयातीति हेतोस्तस्मै संस्थानाय इत्युक्ते तत्प्रशासकेभ्यः तत्प्रकाशनविभागस्य अधिकारिभ्यः विशेषतया डॉ.

सच्चिदानन्दतिवारीमहोदयेभ्यः कर्मचारिभ्यश्चान्येभ्यः भूयो भूयः कार्तज्ञं विज्ञापयामि।

पुस्तकस्यास्य प्रकाशनकर्मणि ये खलु परोक्षरूपेण प्रत्यक्षरूपेण वा सहायतां कृतवन्तः, तेष्वन्यतमः कोटानगर्यामवस्थितायाः **मालवकम्प्युटर्स** इति संस्थायाः संचालकः श्री त्रिलोकमालवः। सोऽसौ मालवः नितरां धन्यवादार्हः, यतो हि अनेन राष्ट्रियसंस्कृतसंस्थानस्य परामर्शानुसारं प्रकाशनपूर्वटङ्कणकर्म सम्पादयितुं सहर्षं स्वीकृतिः प्रदत्ता। टङ्कणकार्यमिदं येन धैर्यपूर्वकं पूर्णतां प्रापितं, सोऽसौ श्री शिवराजमालवः। तदस्मै शिवराजाय साधुवादान् विज्ञापयामि।

क्वचिच्च टङ्कणगतदोषाः मुद्रणगतदोषाः क्वचिच्च स्खलितदोषाः स्युः। अतस्तत्र सहृदयैः काव्यसमीक्षकैः दाक्षिण्यगुणैः क्षन्तव्योऽयं बाल इति शम्।

विजयादशमी
06-10-2011

**उपाध्यायः पूर्णचन्द्रः**
संस्कृतविभागाध्यक्षः
राजकीयमहाविद्यालयः, भवानीमंडी
राजस्थानम्

# अनुक्रमः


| | | |
|---|---|---|
| १. | समाशंसा | iii-iv |
| २. | अथोपोद्घातः | v-xi |
| ३. | मूलपद्यानि | १–१२ |
| ४. | व्याख्याभागः | १३–७७ |

# मूलपद्यानि

### महाकवि-भोलानाथ-विरचितं

# श्रीकृष्णलीलामृतम्

## मूलपद्यानि

यः सर्वत्र महीतलेऽस्ति विदितो देवेन कृष्णात्मना
स्वीयेनैव करेण पुष्पसदृशः प्रस्थापितश्छत्रवत्।
गोपीगोपजनाश्रयावनपरो भूभृत्प्रतापाश्रयः
सोऽयं वः किल कान्तिवर्द्धनपरो गोवर्द्धनो वर्द्धताम्।। 1।।

नाम्ना श्रीरामशर्मा हरिचरणरतिप्राप्तसत्कीर्त्तिकर्मा
तद्ध्यानाप्तावबोधोऽखिलभुवनतलप्राप्ततत्त्वावबोधः।
प्राप्ता विद्यानवद्या हृदि यजनतया यस्य देवस्य भूम्नः
साक्षाद् गोवर्द्धनोऽसौ हरिरचलतया वर्त्ततां सर्वदान्तः ।। 2।।

गोवर्द्धनधराधीश ! गोपगोपीजनाश्रय !
नमस्तुभ्यं नमस्तुभ्यं नरा यत्रामरा इव ।। 3।।

गोवर्द्धनधरं नाथं यशोदानन्दनन्दनम्।
प्रणौमि कृष्णबालं तमबालं पुरुषोत्तमम् ।। 4।।

ब्रजाङ्गनानां हृदयापहारि यत्तदीयरूपं कुसुमायुधाधिकम्।
अहं प्रवृत्तोऽस्मि च तस्य वर्णने मदीयवाचो हसनं भविष्यति ।। 5।।

तथाप्यहं तद्वचनेन पूततां दृढं गमिष्यामि न चेदमन्यथा ।
अतः प्रवृत्तोऽस्मि तदीयवर्णने संभाव्यतां नैव मदीयदूषणम्।। 6।।

जन्माद्यस्य यतः सतां सुकृतिनां स्वर्गापवर्गौ यतो
यत्सेतुर्जगतां भवेद् यदखिलं ब्रह्मेति निष्कर्षतः।
भक्तानां हितहेतवे यदभवत् पूर्णेन्दुबिम्बाननः
कृष्णः सत्यमनन्तमद्वयमसौ चित्ते स्थिरीभूयताम् ।। 7।।

नमस्तुभ्यं नमस्तुभ्यं कृष्णायामिततेजसे।
पूर्णेन्दुवदनानन्दगृहीताखिलचेतसे ।। 8।।

मयूरपिच्छमुकुटः कृष्णः कनककुण्डलः।
पीतवासा घनश्यामः सदैव हृदि वर्त्तताम् ।। 9।।

वनमालोल्लसद्वक्षा वेणुनादविभूषितः।
गोपीजनमनोहारी कृष्णः स हृदि वर्त्तताम् ।। 10।।

गोचारणरतो नित्यं नित्यं भक्तजनाश्रयः।
गोवर्द्धनस्य नाथोऽयं सदा मे हृदि वर्त्तताम् ।। 11।।

यदस्य जन्मजनितं सुखं गोपव्रजौकसाम्।
कोऽपि तं नैव जानाति देवानामपि दुर्लभम् ।। 12।।

जगत्त्रयविभुर्यश्च ब्रह्माद्या यस्य मूर्त्तयः।
स एवाजनि नन्दस्य गेहे साक्षाद्धरिः स्वयम् ।। 13।।

शकटस्य च यो हन्ता गोपीनां हर्षवर्द्धनः।
स च देवः परं ब्रह्म कृष्ण इत्यभिधानतः ।। 14।।

पूतना मृत्युमासाद्य यतो मोक्षमवाप सा।
स्मरणीयोऽनिशं देवः स दुष्टेऽपि कृपानिधिः ।। 15।।

तृणावर्त्तो हतो येन तृणवद्बालरूपिणा।
मातोरसि लुठन्तं तमादायानन्दमाययौ ।। 16।।

बालमव्यक्तकर्माणं बालोपेतं विलोक्य तम्।
बकस्तुण्डेन जग्राह तरसा क्रोधनो बली ।। 17।।

दहन्तमग्निवत्तुण्डं स तत्याजासुरद्रुहम्।
गृहीत्वा तं स तुण्डेन द्विधा चक्रे सुरोत्तमः ।। 18 ।।

चारयन्तं सरित्तीरे वत्सान् बालमरिद्रुहम्।
वत्सासुरोऽभ्यगात्तत्र ज्ञात्वा गोपालनन्दनम् ।। 19 ।।

गृहीत्वा परपादौ तं भ्रामयित्वा व्यपोथयत्।
हरिः शिलायां स तदा गतासुरभवद्बकः ।। 20 ।।

क्षेपयन्तं विषाणाभ्यां सरित्तीरमभीरुवत्।
ज्ञात्वा वृषासुरं कृष्णो हन्तुमभ्यागतः पुरः ।। 21 ।।

गृहीतोत्खातशृङ्गाभ्यां व्यहनत्तं रुषा हरिः ।
गतासुरभवत् सोऽथ पुष्पवृष्टिरभूद्दिवः ।। 22 ।।

अथो जिगमिषा तेषां जाता वृन्दावनं प्रति ।
मृत्युना किल भीतानां गोपानां कृष्णचेतसाम् ।। 23 ।।

आरुह्य शकटान् जग्मू रामकृष्णपुरोगमाः।
गायन्त्यः कृष्णचरितं गोप्यः शुशुभिरेऽध्वनि ।। 24 ।।

ततो वृन्दावनं प्राप्ताः चक्रीकृत्य च सर्वतः।
शकटान् न्यवसन् सर्वे मुदा प्राप्तश्रियो वने ।। 25 ।।

रामकृष्णावुभौ तत्र रेमाते परया मुदा।
गोपाः सवालाःसस्त्रीका गावो वत्साश्च रेमिरे ।। 26 ।।

चलत्तरङ्गनिचया कदम्बतरुशोभिता।
प्रफुल्लेन्दीवरश्यामा यमुना तत्र राजते ।। 27 ।।

कृष्णः कमलपत्राक्षो विजहार सरित्तटे।
गोपीनां वेणुनादेन व्यहरत् सुमना मनः ।। 28 ।।

एकदा सहितो बालैर्दूरं गाश्चारयन् गतः ।
पीतवासा घनश्यामो यत्रास्ते कालियः फणी ।। 29 ।।

विषाग्निना च्वलद्वारि सफेनं बुद्बुदायते।
तद्वायुस्पर्शतो व्योम्नः पतन्ति विहगा ह्रदे ।। 30 ।।

परिधानं दृढं बध्वा कदम्बमधिरुह्य सः।
पपातोपरितः कृष्ण स यत्रास्ते महानहिः ।। 31 ।।

कूर्द्दनोत्थजलेनाशु प्लावितास्तटभूमयः।
विहरन्तं हरिं दृष्ट्वा नागपत्न्योऽवदन् रुषा ।। 32 ।।

गच्छ गच्छाशु रे बाल दन्दशूकोऽस्ति दुष्टधीः ।
तरसा तत उत्थाय भोगी भोगेन चावृणोत् ।। 33 ।।

शरीरशक्त्या निःसार्य गृहीत्वाऽभ्रामयद्धरिः।
क्षीणशक्तिं परित्यच्य तत्फणासु ननर्त्त सः ।। 34 ।।

तत्त्वं तत्त्वं ततस्तत्त्वं तत्त्वतस्तत्त्वतस्तु तत् ।
ततं तेन ततं तेन मृदङ्गध्वनितोऽभवत् ।। 35 ।।

नृत्यति स्म हरिः साक्षादहेर्मूर्द्धसु दर्पहा।
नताननः स्तुवन्नासीद्देवदेवं जगत्पतिम् ।। 36 ।।

तवपादतलाघातैः पूतोऽस्मि भगवन् हरे !।
गङ्गाया उद्भवो याभ्यां नतोऽस्मि प्रणतोऽस्मि तौ ।। 37 ।।

जगज्जनिरभूद्यस्मात्तन्मध्ये दुष्टधीरहम्।
पालनीयोऽस्मि भवता मदीय इति बुद्धितः ।। 38 ।।

नागपत्न्योऽस्तुवन् देवं दण्डवत् पतिताः पुरः ।
अश्रुमुख्यो नतग्रीवाः कृताब्जकरसम्पुटाः ।। 39 ।।

नमस्ते जगन्नाथ भूयो नमस्ते
मुखेन्दो प्रसीदाशु भृत्ये नमस्ते।
वयं दासदास्यो भवामस्त्वदीयाः
त्वदीयाङ्घ्रिपद्मं नताःस्मो नताःस्मः ।। 40 ।।

इति तासां वचः श्रुत्वा प्रसन्नोऽभूज्जगत्पतिः।
गच्छाशु स्वालयं नाग न भयं ते भविष्यति ।। 41 ।।

आज्ञप्तो हरिणा नागो हर्षितः स्वाश्रमं ययौ ।
ततः प्रभृति यमुना निर्विषोदकतां गता ।। 42 ।।

एकदा भगवान् कृष्णः सबालोऽद्रिदिदृक्षया।
चचालाध्वानमाक्रम्य मध्येऽतिष्ठदघासुरः ।। 43 ।।

तं दृष्ट्वाऽद्रिं प्रकल्प्याशु जग्मुर्बालाश्च तन्मुखे।
विचार्य भगवान् कृष्णो ययौ पश्चाद्धसन् मुखे ।। 44 ।।

ववृधेऽन्तर्गले तेन रुद्धश्वासोऽसुरो मृतः।
दृष्ट्या पीयूषवर्षिण्या जीवयन् बालकान् पुनः ।। 45 ।।

निःससार स बालोऽसौ भित्त्वा तद्देहमाययौ।
व्रजवेणुनिनादेन गोपीनां हर्षमावहन् ।। 46 ।।

पुष्पवृष्टिरभूद्व्योम्नो गन्धर्वा ललितं जगुः।
अवादयंस्तथा देवा वादित्राणि च हर्षिताः ।। 47 ।।

मुञ्जाटव्यां वृषादित्ये सबालश्चारयन् स गाः।
प्राप्तो दावानलस्तत्र प्रादुरासीच्च्वलन् दिशः ।। 48 ।।

सभयाः बालकाः सर्वे क्रन्दन्त्यो धेनवोऽभवन्।
पाहि पाहि हरे कृष्ण त्वदीयान् ग्रसतेऽनलः ।। 49 ।।

भयं व्रजत मा बाला निमील्याक्षीणि तिष्ठत।
पपौ स भगवान् दावं तद्भयं दूरतो गतम् ।। 50 ।।

परावृत्त्य जलं पीत्वा नद्याः स्वगृहमाययौ।
प्रावृट् समाययौ पश्चात् सतडिद्घनवृष्टयः ।। 51 ।।

बभूवुर्मुदिताः सर्वे गोपाः कृषिपरायणाः ।
अन्नवृद्धिरभूत् पश्चाद् धनसम्पत्समृद्धयः ।। 52 ।।

शक्रपूजोत्सवं कर्त्तुं नन्दादीनामभून्मनः।
वारयामास भगवान् किमस्माकं सुरेशतः ।।53।।

गिरिर्गोवर्द्धनो नाम देव इष्टप्रदोऽस्ति नः।
कृष्णेनोक्तं वचः श्रुत्वा तत्पूजायां मनो ददुः ।।54।।

घृतक्षीरगुडादीनामन्नादीनां विशेषतः।
संभारान् चक्रुरमितान् गोपा हर्षसमन्विताः ।।55।।

धेनुवत्सानलंकृत्य पूजयामासुरादरात्।
भुक्तमन्नं भगवता रुचितो नगरूपिणा ।।56।।

ननृतुर्बालका गावो जयध्वनिरभूत्ततः ।
तच्छ्रुत्वा क्रोधमापन्नो शक्रः पूजाव्यतिक्रमे।।57।।

संवर्त्तादीन् घनान् तत्र प्रेरयामास दारुणान् ।
ववर्षुरुद्धताः सर्वे धारासंपातवृष्टिभिः ।।58।।

दधौ गोवर्धनं वामकराङ्गुलिकनिष्ठया।
नाचलत् पदमेकं तु प्रसन्नो दिनसप्तकम् ।।59।।

वृष्टिः शान्ताभवत्पश्चात् प्रसेदुश्च दशो दिशः।
गोधनानि पुरस्कृत्य गोप्यो गोपाश्च निस्सृताः ।।60।।

गायन्त्यः कृष्णचरितं हर्षनिर्भरमानसाः ।
गोवर्द्धनगिरिं देवः स्थापयामास पूर्ववत् ।।61।।

सिषेच शक्र आगत्य सुरभ्या साकमम्बरात्।
दण्डवत्पतितो भूमौ कृताञ्जलिपुटो हरिम् ।।62।।

कमलालय कमलास्यं कमलाय कमलनाभमहम्।
गिरिगोवर्द्धननाथं वन्दे कृष्णं गवां नाथम् ।।63।।

कमलकरैः कमलाङ्घ्रेरमरवराः कृतरजःस्पर्शाः ।
अपहृततमोरजस्काः तस्करणं रजोऽनिशं वन्दे ।।64।।

अनयं मां कुरु सनयं ज्ञात्वा स्वीयं त्रिलोकनाथ त्वम्।
परिपाल्योऽहं भवता भवतु न भेदेऽस्ति बुद्धिरियम् ।। 65।।

त्वत्तो जगदिदमुत्थं भगवन् सागरोद्भवा यथा हि कल्लोलाः।
अहमपि त्वत्तो जातः क्षन्तव्यो मेऽपराधोऽसौ ।। 66।।

प्रज्ञा न च मे रसना त्वां स्तोतुं कथमहं प्रवृत्तः स्याम्।
प्रज्ञाहीनः पशुरिव रसनाहीनश्च मण्डूकः ।। 67 ।।

त्वं मे माता त्वं पिता त्वं च बन्धुः
त्वं मे भ्राता त्वं सखा त्वं गुरुश्च ।
त्वत्तो नान्यः कश्चिदस्तीह लोके
स्वीयं ज्ञात्वा पालनीयोऽस्मि नाथ ।। 68।।

इति संस्तूय मघवा भगवन्तमधोक्षजम्।
परिक्रम्य च संसिच्य गोविन्दं स्वर्ययौ च सः ।। 69।।

एकदा यमुनातीरे बुभुजेऽन्नं स बालकः।
कृष्णः कमलपत्राक्षो वत्सा दूरतरं गताः ।। 70।।

आनयिष्यामि वत्सान् वो भुञ्जीतान्नं यथारुचि।
नापश्यत्तत्र गत्वा तान् परावृत्त्य न बालकान् ।। 71।।

क्षणं ध्यात्वाऽगमत्तावद् ब्रह्मकर्मेति माधवः।
तत्तदाकारतां यातो यतः सर्वमयो हरिः ।। 72।।

विरञ्चिरागतस्तत्र व्यतीते हायने पुनः ।
अपश्यद्वीतविज्ञानो हरिमेकमनेकधा ।। 73।।

दण्डवत्पतितो भूमावस्तु पूर्णेक्षणो विधिः।
नापश्यत्तद्द्वितीयं तु बद्धाञ्जलिपुटोऽभवत् ।। 74।।

नमस्तस्मै नमस्तस्मै येनाहं रचितः पुरा ।
नाभिकञ्जाद्विधिर्नाम्ना जगत्कर्त्रेत्यहङ्कृतिः ।।75।।

त्वमेव जगतामीशः प्रभुस्त्वतः परं नहि।
सर्वं खल्विदं ब्रह्म त्वमेवासि जगद्गुरो ।। 76 ।।

नमस्ते वासुदेवाय नमस्ते नन्दसूनवे।
नमो गोपीजनेशाय नमो हृत्तापहारिणे ।। 77 ।।

इति स्तुवन्तं ब्रह्माणमाहासौ जगदीश्वरः।
जाने ते हृद्गतं ब्रह्मन् गच्छ धाम स्वकीयकम् ।। 78 ।।

प्रणम्य स गतो ब्रह्मा कृष्णस्य चरितं स्मरन् ।
परमानन्दमग्नः सन् विस्मृत्य स्वमपि स्वयम् ।। 79 ।।

बाला वत्साश्च सर्वे ते पूर्ववद् गृहमागताः ।
अघं स्मरन्तः स्वानूचुः कृष्णेनाचरितं महत् ।। 80 ।।

शरत्कालोदिते चन्द्रे पूर्णे पुलिनमाश्रितः।
वंशीमवादयत् कृष्णः सप्तस्वरविभूषिताम् ।। 81 ।।

गोप्यस्तद्ध्वनिमाकर्ण्य जग्मुर्वारिप्रवाहवत्।
गृहकार्येऽपि शक्तास्ताः तत्परित्यच्य सत्वराः ।। 82 ।।

भुवं लिखन्त्यः तस्थुस्ताः पादाङ्गुष्ठनखेन तां ।
चकिताः सस्मितास्तूष्णीं कृष्णो नः किं नु वक्ष्यति ।। 83 ।।

निरीक्ष्याग्रे स्थिता बाला हरिराह हसन्पुनः ।
किमर्थमागता यूयं घोरेऽस्मिन् विपिने निशि ।। 84 ।।

स्त्रीणां वै विधिना प्रोक्तः एष धर्मः सनातनः।
पतिरेव सदा सेव्यो मनोवाक्कायकर्मभिः ।। 85 ।।

तस्मात् प्रयात सदनं स्वं स्वमेवाचिरं पुनः।
आत्मारामोऽस्म्यहं बाला न प्रियो नाप्रियो परः ।। 86 ।।

अश्रुमुख्योऽभवन् सर्वाः कृष्णवाक्श्रवणान्तरम्।
शरणागतदीनानां रक्षकोऽसि न चापरः ।। 87 ।।

त्वं पतिस्त्वं गतिः साक्षात्पतेरपि पतिर्भवान् ।
किमर्थमागता यूयं नैव वाच्यं त्वया विभो ।। 88 ।।

इति तासां वचः श्रुत्वा रहस्यार्थं मनो दधे।
सुधाकरः शरच्छत्रः व्योममध्ये स्थितोऽभवत् ।। 89 ।।

काश्चिद् वाद्यपरा गोप्यो गायिकाश्च तथाऽपराः।
ततः प्रवृत्त आरम्भो रासस्य यमुनातटे ।। 90 ।।

अन्योन्यं बद्धबाहुभ्यां गोपीनां च द्वयोर्द्वयोः ।
मध्यगोऽभूद्धरिः साक्षाद् हेम्नां नीलमणिर्यथा ।। 91 ।।

थेई थेई तिथेईति तत्तथेईति तत्तथा।
धिकटध्धिकटध्धिध्धिध्धिकटध्धिकटध्वनिः ।। 92 ।।

अभवत् परतस्तत्र हरिर्गीतमगायत।
गोप्यो जगुश्च ननृतुस्तालैक्येन परस्परम् ।। 93 ।।

बालानां निष्ककण्ठीनां नृत्यन्तीनां विशेषतः ।
स्वकीयपाणिना कृष्णः स्वेदविन्दूनमीमृजत् ।। 94 ।।

यमुनाकूलमाश्रित्य रेमे ताभिः समं प्रभुः ।
एकाऽवदत् विभुं तासां न गन्तुं शक्यते मया ।। 95 ।।

स्कन्धमारुह्य कान्ते त्वां नयामि चपलोपमाम् ।
गन्तुकामनया यत्र तत्रैवान्तरधीयत ।। 96 ।।

अन्तर्हितं तमालोक्य कृष्णं ता गोपदारकाः ।
उच्चैस्तरां तु रुरुदुः क्व गतो वनमध्यतः ।। 97 ।।

वटतरुर्भवतीव भवान् पटुः
भवतरुस्तव नाम च गीयते ।
हरिरसौ विषयीकृत एव ते
वद स कुत्र गतो न हि दृश्यते ।। 98 ।।

चलदल त्वमसीव हरेस्तरुः
किमथवा हरिरेव च गीयसे।
परमकारुणिकस्य पदं गतः
स च हरिः क्व गतः क्व गतो वद ।। 99।।

बकुलसालरसालकदाडिमाः
पनसनिम्बकदम्बकचम्पकाः ।
कृतसमाधिवशीकृतमानसाः
स च हरिः क्व गतो विषयीकृतः ।। 100।।

एवं लपन्त्यो रुरुदुः हरिः प्रत्यक्षतां गतः ।
काश्चित् पाणिं पदौ काश्चित् हृदयेऽधुर्मुदं गताः ।। 101।।

कृष्णेन सह कृतस्नानविहारास्ताः सरिज्जले।
गायन्त्यः कृष्णचरितं गताः स्वं स्वं गृहं पुनः ।। 102।।

यः पिबेत् सस्पृहं भक्त्या कृष्णलीलामृतं जनः।
वैकुण्ठलोकं गत्वा स रमते कृष्णसन्निधौ ।। 103।।

श्री प्रतापस्य नृपतेः न्यवसत् सुखसद्मनि।
श्रीरामस्वामिनो भर्त्ता गोवर्द्धनधरः प्रभुः ।। 104।।

स्वस्ति श्रीमत्कविभोलानाथस्य कृतौ श्रीकृष्णलीलामृतं समाप्तम् ।

# व्याख्याभागः

# व्याख्याभागः

**यः सर्वत्र महोतलेऽस्ति विदितो देवेन कृष्णात्मना**
**स्वीयेनैव करेण पुष्पसदृशः प्रस्थापितश्छत्रवत्।**
**गोपीगोपजनाश्रयावनपरो भूभृत्प्रतापाश्रयः**
**सोऽयं वः किल कान्तिवर्द्धनपरो गोवर्द्धनो वर्द्धताम्।। 1।।**

**अन्वयः**– गोपीगोपजनाश्रयावनपरः भूभृत्प्रतापाश्रयः यः कृष्णात्मना देवेन स्वीयेनैव करेण पुष्पसदृशः छत्रवत् प्रस्थापितः इति सर्वत्र महीतले विदितः, सोऽयं वः कान्तिवर्धनपरः गोवर्द्धनः वर्द्धताम्।।

**संस्कृतव्याख्या**– गोपीगोपजनाश्रयावनपरः गोपीनां गोपाङ्गनानां गोपानां गोपालकानां च जनानां लोकानाम् आश्रयावने संरक्षणे परः निपुणः तत्परो वा यः स, भूभृत्प्रतापाश्रयः भुवं बिभ्रति ये ते भूभृतः तेषां क्ष्मापालकानां यः प्रतापः पराक्रमः तस्य आश्रयः शरण्यभूतः यः सः अथवा भूभृत् राजा चासौ प्रताप एतदाख्यः जयपुरनरेशः सः खलु कवेः भोलानाथस्य आश्रयदाता च इति भूभृत्प्रतापः (कर्मधारयः) तस्य आश्रयः शरण्यभूतः यः सः, (एवंभूतः) यः गोवर्धनपर्वतः, कृष्णात्मना एतन्नामधेयेन वसुदेवसुतेन, देवेन विबुधेन, स्वीयेनैव स्वकीयेनैव, करेण हस्तेन,पुष्पसदृशः कुसुमवत्, छत्रवत् आतपत्रं यथा स्यात्तथा, प्रस्थापित उत्थापितः (इति) सर्वत्र सर्वेषु स्थानेषु, महीतले भुवि, विदितः ज्ञातः सोऽयं स एवायं पर्वतराजः, वः युष्माकं सहृदयसामाजिकानां सामान्यजनानां च, कान्तिवर्धनपरः सौन्दर्यवर्धनधुरन्धरः श्रीवर्धको वा, गोवर्द्धनः गवां वर्धनं पोषणं वा क्रियते येन सः एतन्नामधेयः गिरिराजः, वर्द्धतां समृद्धिमेतु। वर्धतामित्यनेन क्रियापदेन नमस्कारः आक्षिप्यते। तं प्रति प्रणतोऽस्मि इत्यर्थः।

परमपुरुषभगवच्छ्रीकृष्णस्य करस्पर्शेण पवित्रीकृतात्मा सकलजीव-शरण्यः गोसम्पद्वर्धनकारी नितरां सर्वगुणसम्पन्नः गोवर्धनपर्वतः पौनः पुन्येनोत्तरोत्तरं

समृद्धिं प्राप्नोत्विति भावः। अपरोऽपि भावः द्योतते यत् पवित्रात्माऽयं पर्वतराजः युष्माकं सकलसहृदयसामाजिकानां श्रीवर्धनमाध्यमेन कल्याणं विदधात्विति।

पद्यमिदं शार्दूलविक्रीडितच्छन्दसा निबद्धम्। एतल्लक्षणं यथा–

''सूर्याश्वैर्यदि मःसजौ सततगाः शार्दूलविक्रीडितम्'' इति (छन्दोमञ्जरी) पद्येऽस्मिन्ननुप्रासालंकारस्यालंकरणं ''वर्द्धन'' इति व्यञ्जनसमूहस्य बारम्बारमुच्चार्यत्वात्। उक्तं चैतल्लक्षणं काव्यशास्त्रे– ''अनुप्रासः शब्दसाम्यं वैषम्येऽपि स्वरस्य यत्।'' (सा.द.10/2)। अपि च गोवर्द्धनपर्वतस्य समृद्धिवर्णनादुदात्तालंकारोऽपि संगच्छते। एतल्लक्षणं यथा – ''उदात्तं वस्तुनः सम्पत्'' इति। (का.प्र.10/155)

पद्येऽस्मिन् कविना कविपरम्परामनुसृत्य ''वर्धताम्'' इति पदेन नमस्कारात्मकं मंगलाचरणं विहितम्। अपि च ''वः कान्तिवर्धनपरः'' इत्यनेन वाक्यांशेन आशीर्वादात्मकं मंगलमपि विहितमिति अहो कवेरपूर्व कवित्वप्रातिभ्यमिति।

**भाषार्थः**– जिस पर्वतराज ने ग्वालों एवं ग्वालियों को आश्रय दिया है, और जो राजा प्रताप के या प्रभावशाली राजाओं के शरण रक्षक हैं तथा जिसे भगवान् श्रीकृष्ण ने एक हाथ पर पुष्प की तरह धारण किया है ऐसी प्रसिद्धि प्राप्त करने वाले कल्याणकारी गोवर्धन पर्वत समृद्धि को प्राप्त करे।

**नाम्ना श्रीरामशर्मा हरिचरणरतिप्राप्तसत्कीर्त्तिकर्मा**
**तद्ध्यानाप्तावबोधोऽखिलभुवनतलप्राप्ततत्त्वावबोधः।**
**प्राप्ता विद्यानवद्या हृदि यजनतया यस्य देवस्य भूम्नः**
**साक्षाद् गोवर्द्धनोऽसौ हरिरचलतया वर्त्ततां सर्वदान्तः।। 2।।**

**अन्वयः**– हरिचरणरतिप्राप्तसत्कीर्त्तिकर्मा (यः) नाम्ना श्रीरामशर्मा, तद्ध्यानाप्तावबोधः (सः) अखिलभुवनतलप्राप्ततत्त्वावबोधः (संजातः) (अपि च) यस्य देवस्य भूम्नः (पाददेशे) यजनतया (तेन) हृदि अनवद्या विद्या प्राप्ता, अचलतया, साक्षाद् हरिः (सः) असौ गोवर्धनः सर्वदान्तः वर्त्तताम्।

**संस्कृतव्याख्या**- हरिचरणरतिप्राप्तसत्कीर्त्तिकर्मा हरिः नाम पर्वतः भगवान् विष्णुर्वा तस्य चरणेषु पाददेशेषु पक्षे च चरणयोः पादयो रतिः श्रद्धा भक्तिर्वा तया प्राप्ता सत्कीर्त्तिः सुयशः सत्कर्म शोभनं कर्म च येन सः, (यः) नाम्ना संज्ञया, श्रीरामशर्मा इति श्रीभोलानाथस्य पूर्वजः, तद्ध्यानाप्तावबोधः तस्य हरेः भगवतः विष्णोः तत्स्वरूपकस्य पर्वतराजस्य गोवर्धनस्य वा ध्यानेन समाराधनेन आप्त : प्राप्तः अवबोधः विवेकः येन सः, (सः) अखिलभुवन-तलप्राप्ततत्त्वावबोधः अखिलभुवनतले समस्तसंसारे प्राप्तानां तत्त्वानां सारभूनानां पदार्थानाम् अवबोधः ज्ञानं यस्य सः (बहुव्रीहिः) (संजातः) (अपि च) यस्य देवस्य पवित्रात्मनः, भूम्नः स्थानस्य (पाददेशे) यजनतया यज्ञकर्मसम्पादनेन, (तेन श्रीरामशर्मणा) हृदि चेतसि, अनवद्या अनिन्दनीया सुप्रसिद्धा वा, विद्या ज्ञानं प्राप्ता अवाप्ता, अचलतया निश्चलतया स्थैर्येण वा, साक्षात् मूर्त्तिमान्, हरिः भगवान् विष्णुस्वरूपकः (सः) असौ अयं गोवर्धन एतन्नामधेयः गोपकुलाराध्यः पर्वतविशेषः सर्वदान्तः सर्वप्रसिद्धः, वर्त्तताम् तिष्ठतु।

भगवतः विष्णोः परमभक्तः श्रीरामशर्मा इति नामधेयः कवेः भोलानाथस्य पूर्वजः विष्णोरात्मभूतस्य यस्य गोवर्धनपर्वतस्याराधनया निखिलतत्त्ववेत्ता परमविद्वांश्च संजात इति कृत्वा पर्वतोऽसौ गोवर्धनः सर्वप्रसिद्धिमेत्विति भावः।

पद्यमिदं स्रग्धराच्छन्दसा निबद्धम्। तल्लक्षणं यथा -

"म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्त्तितेयम्।" इति, (छन्दोमञ्जरी)

पद्येऽस्मिन् अनुप्रासोऽलंकारः। यतोहि 'र' इति वर्णस्य, 'व' इति वर्णस्य, 'ल' इति वर्णस्य, 'द्य' इति वर्णस्य चेत्येतेषां वारम्वारमुचार्यत्वम्।

**भाषार्थः**- भगवान् विष्णु के चरणकमल पर सदा भक्ति भाव होने के कारण जो यशस्वी एवं सत्कर्मी हैं, वही कवि भोलानाथ के पूर्वज श्रीरामशर्मा भगवान् विष्णु अथवा विष्णु के आत्मस्वरूप गोवर्धन जी के सतत आराधना से विवेकवान् हुए, साथ ही जिस गोवर्धनराज के पाददेश में यज्ञकार्य के

सम्पादन से जिन्होंने अपने हृदय में अत्यन्त महनीय विद्या का अर्जन किया है, स्थिरता के कारण विष्णु के आत्मस्वरूप वही पर्वतराज गोवर्धन सर्वथा प्रसिद्धि को प्राप्त करे।

**गोवर्द्धनधराधीश ! गोपगोपीजनाश्रय !**
**नमस्तुभ्यं नमस्तुभ्यं नरा यत्रामरा इव ।। 3।।**

**अन्वयः**- (हे) गोवर्द्धनधराधीश ! गोपगोपीजनाश्रय ! यत्र (त्वयि) नराः अमरा इव (निवसन्ति) (एवंभूताय) तुभ्यं नमः तुभ्यं नमः।

**संस्कृतव्याख्या**- हे गोवर्द्धनधराधीश ! गोवर्द्धनम् एतन्नामधेयं पर्वतं धरते धारयति यः सः गोवर्द्धनधरः श्रीकृष्णः स च अधीशः प्रभुश्च तत्सम्बोधने, गोपगोपीजनाश्रय गोपानां गोपालकानां गोपीनां गोपाङ्गनानां च जनानां गोकुलवास्तव्यानाम् आश्रयः यः तत्सम्बोधने, यत्र यस्मिन् त्वयि, नराः मानवाः, अमरा इव देवा इव, ''अमराः निर्जराः देवा'' इत्यमरः। (निवसन्ति सुखपूर्वकमुपवसन्ति)।

(एवंभूताय सर्वशक्तिसम्पन्नाय) तुभ्यं वासुदेवाय, नमः नमस्कारः । सातिशयभक्तिभावप्रदर्शनार्थमेवात्र नमस्तुभ्यमिति पदं द्विरुच्चारितम्।

गोपानां गोपाङ्गनानां चाश्रयदाता अपि च गोवर्द्धनपर्वतस्य यः धारयिता, यास्याश्रयत्वेन च सर्वेऽपि पार्थिवाः स्वर्गसुखं लभन्ते, एवंभूतः स परमपुरुषः श्रीकृष्णः सर्वैः प्रणम्य इति भावः। पद्यमिदमनुष्टुप्च्छन्दसा निबद्धम्। एतल्लक्षणं यथा-

**''श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पञ्चमम्।**
**द्विश्चतुष्पादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः।।''**

अपि च पद्येऽस्मिन्ननुप्रासोऽलंकारः।

**भाषार्थः**- जिन के शरण में जाने पर लोगों को अमरत्व प्राप्त होता है, ऐसे गोपवासियों के शरण रक्षक, गोवर्धन पर्वत को धारण करने वाले वासुदेव श्रीकृष्ण को मेरा (कवि का) नमस्कार।

**गोवर्द्धनधरं नाथं यशोदानन्दनन्दनम्।**
**प्रणौमि कृष्णबालं तमबालं पुरुषोत्तमम् ।।4।।**

**अन्वयः**- (अहं) यशोदानन्दनन्दनं कृष्णबालं गोवर्धनधरं तम् अबालं नाथं पुरुषोत्तमं प्रणौमि।

**संस्कृव्याख्या**- (अहं भोलानाथः काव्यकर्त्ता) यशोदानन्दनन्दनं यशोदां नन्दपत्नीं नन्दं गोपपुराधिपतिं च नन्दयति प्रसादयति यः तं, कृष्णबालं कृष्णः वासुदेवश्चासौ बालश्चेति कृष्णबालः तं, बाल्यावस्थकं श्रीकृष्णमित्यर्थः। तम् अबालं न बाल अबोधः इति अबालः तं समर्थवन्तं बुद्धिमन्तं वा, नाथं सर्वेषां शरणरक्षकं, पुरुषोत्तमं पुरुषाणां पुरुषेषु वा उत्तमः श्रेष्ठः पुरुषोत्तमः तं देवकीनन्दनं, ''देवकीनन्दनः शौरिः श्रीपतिः पुरुषोत्तमः'' इत्यमरः। प्रणौमि प्रणमामि। सातिशयं नमामीत्यर्थः।

काव्यस्यास्य कर्त्ता श्रीभोलानाथः वासुदेवं श्रीकृष्णं प्रणमतीतिभावः।

पद्येऽस्मिन्''नन्दनन्दनमि''त्यत्र अनुप्रासोऽलंकारः यमकोऽपि। अपि च ''कृष्णबालं तमबालमि'' त्यत्र अनुप्रासः विरोधाभासोऽपि। पद्येऽस्मिन् पौराणिकं वृत्तमपि निहितं यद् देवराजस्येन्द्रस्य प्रकोपजनितभयङ्करवृष्टेः गोपानां गवादीनां च संरक्षणार्थं वासुदेवेन श्रीकृष्णेन स्ववामहस्तस्थकनिष्ठिकाङ्गुल्यां गोवर्द्धनगिरिरुत्थापित इति।

**भाषार्थः**- मैं कवि भोलानाथ यशोदा मैया व नन्दबाबा को आनन्दित करने वाले बालकृष्ण तथा गोवर्धन पर्वत को धारण करने वाले समर्थ उस सर्वेश्वर पुरुषोत्तम भगवान् श्रीकृष्ण को प्रणाम करता हूँ।

**ब्रजाङ्गनानां हृदयापहारि यत्तदीयरूपं कुसुमायुधाधिकम्।**
**अहं प्रवृत्तोऽस्मि च तस्य वर्णने मदीयवाचो हसनं भविष्यति।।5।।**

**अन्वयः**- व्रजाङ्गनानां हृदयापहारि कुसुमायुधाधिकं यत् तदीयरूपं, अहं च तस्य वर्णने प्रवृत्तोऽस्मि (परन्तु) मदीयवाचः हसनं भविष्यति।

**संस्कृतव्याख्या**– व्रजाङ्गनानां व्रजपुरवासिनीनां गोपाङ्गनानां वा, हृदयापहारि चित्तापकर्षकं, कुसुमायुधाधिकं कुसुमानि पुष्पाणि एव आयुधानि अस्त्राणि यस्य सः कामदेवः तस्मात् अधिकम् उन्नतं यत् तदीयं श्रीकृष्णसम्बन्धि रूपं सौन्दर्यं, अहं भोलानाथः, च तस्य मनोहारिणः रूपस्य, वर्णने चित्रणे, प्रवृत्तोऽस्मि सम्पृक्तोऽस्मि। (परन्तु) मदीयवाचः, मद्वचनं, हसनम् उपहासास्पदं, भविष्यति।

भगवतः श्रीकृष्णस्य, यत्सौन्दर्यं तत्तु गोपाङ्गनानां हृदयानन्दकारि वर्त्तते। एतादृशस्यानुपमसौन्दर्यस्य प्रतिपादने भोलानाथः आत्मानमसमर्थमयोग्यं वा मनुते इति भावः।

पद्येऽस्मिन् वंशस्थवृत्तं संगच्छते। एतल्लक्षणं यथा–

**''जतौ तु वंषस्थमुदीरितं जरौ'' इति।**

**भाषार्थः**– गोपियों के दिल को आकृष्ट करने वाले श्रीकृष्ण का जो सौन्दर्य, वह कामदेव के सौन्दर्य से भी बढ़ कर है, ऐसे अलौकिक सौन्दर्य का वर्णन करने मे प्रवृत्त मैं भोलानाथ उपहास का पात्र बनूंगा।

**तथाप्यहं तद्वचनेन पूततां दृढं गमिष्यामि न चेदमन्यथा।**
**अतः प्रवृत्तोऽस्मि तदीयवर्णने संभाव्यतां नैव मदीयदूषणम्।। 6।।**

**अन्वयः**– तथापि अहं तद्वचनेन दृढं पूततां गमिष्यामि, इदं च अन्यथा न (अस्ति) । अतः तदीयवर्णने प्रवृत्तोऽस्मि। (अत्र) मदीयदूषणं नैव संभाव्यताम्।

**संस्कृतव्याख्या**– तथापि उपर्युक्तपरिस्थितावपि, अहं भोलानाथः तद्वचनेन तस्य श्रीकृष्णस्य वचनेन गुणादिवर्णनात्मकवचसा दृढम् अत्यर्थं प्राचुर्येण वा, पूततां पवित्रतां गमिष्यामि प्राप्स्यामि। इदं च एतत्तथ्यमपि, अन्यथा निरर्थकं, नास्ति। अतः एतस्मात्कारणादेव, तदीयवर्णने भगवच्छ्रीकृष्णगुणवर्णने, प्रवृत्तोऽस्मि सम्पृक्तोऽस्मि। (अत्र) मदीयदूषणं मम कश्चिद्दोषः निर्बोधत्वं वा, नैव नहि, संभाव्यतां संभावनीयम् अन्वेषणीयं वा। इति।

श्रीकृष्णस्य गुणात्मकलीलावर्णनेन पवित्रातिशयतां प्राप्स्यतीति प्रत्ययादेव भोलानाथः तद्गुणख्यापने आत्मानं नियोजयति। अतस्तत्र न तस्य किमपि वालिशत्वमाविष्करणीयं सूरिभिरिति भावः।

पद्यमिदमपि वंशस्थवृत्तेन निबद्धम्। अपि चात्र पदार्थहेतुक-काव्यलिङ्गस्य सद्भावः।

**भाषार्थः**- श्रीकृष्णके लीलामृत के वर्णन से मेरी आत्मा अत्यधिक पवित्र हो जावेगी और यह तथ्य नितान्त सत्य है। इसलिये मैं भोलानाथ श्रीकृष्ण के गुणगान कार्य में लिप्त हूँ। इस में मेरी किसी भी प्रकार की मूर्खता नहीं है।

**जन्माद्यस्य यतः सतां सुकृतिनां स्वर्गापवर्गौ यतो**
**यत्सेतुर्जगतां भवेद् यदखिलं ब्रह्मेति निष्कर्षतः।**
**भक्तानां हितहेतवे यदभवत् पूर्णेन्दुबिम्बाननः**
**कृष्णः सत्यमनन्तमद्वयमसौ चित्ते स्थिरीभूयताम्।। 7।।**

**अन्वयः**- यतः अस्य जन्मादि सतां सुकृतिनां स्वर्गापवर्गौ (साधयति), निष्कर्षतः यत् अखिलं ब्रह्म इति जगतां सेतुः भवेत्, यद् भक्तानां हितहेतवे अभवत्, सत्यम् अनन्तम् अद्वयम् असौ पूर्णेन्दुबिम्बाननः कृष्णः चित्ते स्थिरीभूयताम्।

**संस्कृतव्याख्या**- यतः यस्मात् कारणात् अस्य श्रीकृष्णस्य, जन्मादि उत्पत्त्यादिकं (अवताररूपेण मानवशरीरधारणमित्यर्थः) सतां सज्जनानां, सुकृतिनां पुण्यवतां, स्वर्गापवर्गौ स्वर्गश्च सुरलोकश्च अपवर्गश्च मोक्षश्चेत्येतौ, (साधयति), निष्कर्षतः साररूपेण, यत् तत्त्वम्, अखिलं समग्रं, ब्रह्म अनिर्वचनीयं तत्त्वम्, जगतां चतुर्दशलोकानां, सेतुः सर्वसम्मतः आधारस्तम्भो वा, भवेत् स्यात्। यत् भक्तानां भगवत्प्रियाणां, हितहेतवे कल्याणसाधनाय, अभवत् संजातम्, सत्यं शाश्वतस्वरूपकम्, अनन्तम् अपरिमितम्, अद्वयम् न द्वयमिति अद्वयम् एकमित्यर्थः, असौ अयं, पूर्णेन्दुबिम्बाननः चन्द्रमुखः, कृष्णः वासुदेवः, चित्ते मे हृदये, स्थिरीभूयताम् सर्वदैव सत्तां लभताम्, इति।

भगवतामरशरीरधारणपूर्वकमवतारग्रहणेन पुण्यवद्भिः तद्दर्शनजन्य-पुण्येन मोक्षात्मकं फलं प्राप्यते। तदिदं भगवत्सत्तात्मकं तत्त्वं समग्राणां चतुर्दशभुवनानामाधारभूतमस्ति, इति हेतोः भक्तानां सर्वथा कल्याणसाधकम्। अद्वितीयब्रह्मस्वरूपकोऽयं श्रीकृष्णः मे चेतसि सर्वदैव लसतामिति कविः भोलानाथः नितरां कामयते इति भावः।

पद्यमिदं शार्दूलविक्रीडितच्छन्दसा निबद्धम्। एतल्लक्षणं यथा-

**''सूर्याश्वैर्मसजास्ततः सगुरवः शार्दूलविक्रीडितम्'' इति।**

**भाषार्थः**- जिस श्रीकृष्ण के पवित्रतम जन्मवृत्तादि पुण्यात्मा सज्जनों के स्वर्ग एवं मोक्ष प्राप्ति का कारण है और जिस तत्त्व को साररूप से ब्रह्म कहा जाता है, जो कि समग्र संसार का आधार स्तम्भ है, और जो समस्त भक्तों के कल्याणकारी है, ऐसे अनन्त शाश्वत अद्वितीय सत्तात्मक वह श्रीकृष्ण मेरे हृदय में नित्य निवास करें।

**नमस्तुभ्यं नमस्तुभ्यं कृष्णायामिततेजसे।**<br>
**पूर्णेन्दुवदनानन्दगृहीताखिलचेतसे ।।४।।**

**अन्वयः**- पूर्णेन्दुवदनानन्दगृहीताखिलचेतसे अमिततेजसे कृष्णाय तुभ्यं नमः तुभ्यं नमः।

**संस्कृतव्याख्या**- पूर्णश्चासौ इन्दुश्चेति पूर्णेन्दुः (कर्मधारयः) पूर्णचन्द्रः स इव वदनम् आननं यस्य सः पूर्णेन्दुवदनः स एव आनन्दः आह्लादकः तस्मात्कारणादेव गृहीतानि आकृष्टानि अखिलानि समस्तानि चेतांसि अन्तःकरणानि येन तस्मै, अमिततेजसे न मितानि अमितानि नाम अपरिमितानि तेजांसि ओजांसि यस्य तस्मै, कृष्णाय वासुदेवाय, तुभ्यं भवते, नमः प्रणामः, तुभ्यं ते, नमः नमस्कारः।

अलौकिकसौन्दर्यवत्त्वात्सकलभक्तहृदयग्राहिणेऽपरिमितपराक्रमशालिने वासुदेवाय ते नमः इति भावः। पद्यमिदमनुष्टुप्छन्दसा निबद्धम्, अपि चात्रानुप्रासालंकारस्यालंकरणत्वम्।

**भाषार्थः**- स्तुति करते हुए कवि कहते हैं कि जिस प्रकार पूनम का चांद सब को आह्लादित कर देता है, उसी प्रकार सभी के दिल को प्रमोदित करने वाले अप्रतिहतपराक्रमशाली श्रीकृष्ण को मेरा नमस्कार।

**मयूरपिच्छमुकुटः कृष्णः कनककुण्डलः।**
**पीतवासा घनश्यामः सदैव हृदि वर्त्तताम् ।। 9।।**

**अन्वयः**- मयूरपिच्छमुकुटः कनककुण्डलः पीतवासा घनश्यामः सदैव ( मे ) हृदि वर्त्तताम्।

**संस्कृतव्याख्या**- मयूरपिच्छमुकुटः मयूरस्य केकिनः पिच्छमेव शिखण्ड एव मुकुटं शिरोभूषणं यस्य सः (बहुब्रीहिः) ''शिखण्डश्च पिच्छवर्हे नपुंसके'' इत्यमरः। कनककुण्डलः कनकस्य सुवर्णस्य कुण्डले कर्णभूषणे यस्य सः, पीतवासा पीतः हरिद्राभः वासः वसनं यस्य सः, घनश्यामः घन इव मेघ इव श्यामः कृष्णः यः (एवंभूतः सः) कृष्णः वासुदेवः सदैव सर्वदा सततं वा, (मम) हृदि चेतसि, वर्त्तताम् तिष्ठतु निवसतु वा।

बहुविधैरलंकारैरलंकृतः भगवान् यशोदानन्दनः श्रीकृष्णः सततमेव मे भोलानाथस्य हृदये विलसतामिति भावः । पद्येऽस्मिन्ननुष्टुप्च्छन्दः, परिकरश्चालंकारः। उक्तं चैतल्लक्षणं यथा :-

''**विशेषणैर्यत्साकूतैरुक्तिः परिकरस्तु सः**'' (का.प्र.10/118)

भाषार्थः- जिन के मस्तक पर मोर पिच्छ सुशोभित है, जिन के कानों पर सोने के कुण्डल हैं और जिन्होने पीले रंग का वस्त्र धारण कर रखा है, ऐसे बादल की तरह सांवले वासुदेव श्रीकृष्ण मेरे हृदय में सदैव विराजते रहें।

**वनमालोल्लसद्वक्षा वेणुनादविभूषितः।**
**गोपीजनमनोहारी कृष्णः स हृदि वर्त्तताम् ।। 10।।**

**अन्वयः**- वनमालोल्लसद्वक्षा वेणुनादविभूषितः गोपीजनमनोहारी सः कृष्णः हृदि वर्त्तताम्।।

**संस्कृतव्याख्या**- वनमालोल्लसद्वक्षा वनमाला नाम पुष्पमाल्यविशेषः तेन उल्लसितं (उत्+लस्+क्त) सुशोभितं वक्ष उरः यस्य सः, वेणुनादविभूषितः वेणुनादेन वंशस्वनेन विभूषित अलंकृतः यः सः, गोपीजनमनोहारी गोपीजनानां गोपाङ्गनानां मनांसि चेतांसि हरते आकर्षति यः सः, (एवंभूतः) स असौ, कृष्णः वासुदेवः, हृदि चेतसि मदीये, वर्त्ततां तिष्ठतु।

कविः भोलानाथः वासुदेवं श्रीकृष्णं स्तुवन् ब्रूते यद् यस्य वक्षःस्थले वनमाला सुशोभते, यश्च वेणुं निनादयति एवंभूतः गोपाङ्गनाचित्तापहारकः सः कृष्णः मदीये हृदये सततं लसतामिति भावः।

पद्यमिदमप्यनुष्टुप्छन्दसा निबद्धम्। अत्रापि परिकरोऽलंकारः।

**भाषार्थः**- जिन का वक्षःस्थल वनमाला से सुशोभित हैं व बांसुरी की आवाज से जो अलंकृत हैं और जो गोपिकाओं के दिल को हरने वाले हैं ऐसे वह श्रीकृष्ण मेरे हृदय में निवास करें।

**गोचारणरतो नित्यं नित्यं भक्तजनाश्रयः।**
**गोवर्द्धनस्य नाथोऽयं सदा मे हृदि वर्त्तताम् ।। 11 ।।**

**अन्वयः**- (यः) नित्यं गोचारणरतः (यश्च) नित्यं भक्तजनाश्रयः । (सः) अयं गोवर्धनस्य नाथः सदा मे हृदि वर्त्तताम्।

**संस्कृतव्याख्या**- यः नित्यं सततं, गोचारणरतः गवां सौरभेयानां चारणं शष्पादानकर्म तस्मिन् रतः संपृक्तः, यश्च नित्यं सर्वदा, भक्तजनाश्रयः भक्तजनानां तदाराधकानाम् आश्रयः संरक्षकः, सोऽयं सोऽसौ, गोवर्धनस्य गोवर्धन इत्येतन्नामधेयस्य पर्वतस्य नाथः स्वामी, सदा सर्वदा मे मम, हृदि चेतसि, वर्त्ततां राजताम्।

सर्वदा गोपालनकर्मव्यापृतः भक्तजनरक्षकश्चासौ गोवर्धनपर्वतेशः श्रीकृष्णः हृदये मदीये सततमेव लसतामिति भावः।

पद्येऽस्मिन्ननुप्रासोऽलंकारः संगच्छते।

भाषार्थ:- जो सर्वदा गाय चराने के कार्य में व्यस्त रहते हैं तथा भक्तजनों के आश्रय दाता है ऐसे गोवर्धन स्वामी भगवान् श्रीकृष्ण मेरे हृदय में हमेशा निवास करें।

**यदस्य जन्मजनितं सुखं गोपव्रजौकसाम्।**
**कोऽपि तं नैव जानाति देवानामपि दुर्लभम् ।। 12 ।।**

**अन्वय:**- गोपव्रजौकसां यदस्य जन्मजनितं सुखं तत्तु देवानामपि दुर्लभम् । तं कोऽपि नैव जानाति।

**संस्कृतव्याख्या**- गोपवव्रजौकसां गोपालकव्रजवासिनाम्, अस्य श्रीकृष्णस्य जन्मजनितम् उत्पत्तिमूलकं यत् सुखं मनोऽनुकूलसंवेदनम्, देवानामपि अमराणां कृतेऽपि, ''अमरा निर्जरा: देवा:...'' इत्यमर: (तत्) दुर्लभम् दुष्प्रापम्, तं श्रीकृष्णं कोऽपि कश्चिदपि सामान्यजन इत्यर्थ:, नैव नहि, जानाति ज्ञातुं समर्थोऽस्ति।

यस्य श्रीकृष्णस्य जन्मजनितं सुखं गोपालकानां कृते अतीव सुकरम्, तत्तु देवानां कृतेऽपि अत्यन्तं दुर्लभम्। एवंभूतं भगवन्तं श्रीकृष्णं सामान्य: कश्चिज्जन: कथं जानीयादिति भाव:।

**भाषार्थ:**- जिस श्रीकृष्ण का जन्म जनित सुख गोपालक व्रजवासियों के लिये अत्यन्त सुकर है, वह सुख देवताओं के लिये भी अत्यन्त दुर्लभ है, ऐसे वासुदेव श्रीकृष्ण को सामान्य जन कौन होगा, जो समझ सकता है अर्थात् कोई भी उन्हें समझने में समर्थ नहीं है।

**जगत्त्रयविभुर्यश्च ब्रह्माद्या यस्य मूर्त्तय:।**
**स एवाजनि नन्दस्य गेहे साक्षाद्धरि: स्वयम् ।। 13 ।।**

**अन्वय:**- यश्च जगत्त्रयविभु:, ब्रह्माद्या यस्य मूर्त्तय: स एव साक्षात् हरि: नन्दस्य गेहे स्वयम् अजनि।

**संस्कृतव्याख्या**- यश्च यस्तु, जगत्त्रयविभु: जगत्त्रयस्य संसारत्रितयस्य भूदिव्य-पाताललोकात्मकस्य विभु: प्रभु:, ब्रह्माद्या पितामहाद्या: आदिदेवा:,

यस्य श्रीकृष्णस्य मूर्त्तय: स्वरूपका:, स एव साक्षात् मूर्तिमान्, हरि: विष्णु:, नन्दस्य गोपाधिपते:, गेहे गृहे स्वयम् आत्मनैव, अजनि जनिं स्वीचकार।

ब्रह्मादय: जगत्त्रितयश्रेष्ठस्य यस्य स्वरूपका एव सन्ति, स एव मूर्त्तिमान् विष्णु: स्वयमेव गोपाधिपते: नन्दस्य गृहे जन्मग्रहणमकरोत्।

**भाषार्थ:**- जो स्वर्गमर्त्यपातालात्मक तीनों जगत के स्वामी हैं और ब्रह्मादि त्रिदेव जिन के अशंस्वरूप हैं उसी मूर्त्तिमान् भगवान् विष्णु ने स्वयं ही नन्द बाबा के घर में जन्म लिया है।

**शकटस्य च यो हन्ता गोपीनां हर्षवर्द्धन:।**
**स च देव: परं ब्रह्म कृष्ण इत्यभिधानत: ।। 14 ।।**

**अन्वय:**- य: शकटस्य हन्ता (य:) च गोपीनां हर्षवर्द्धन: स च देव: कृष्ण इत्यभिधानत: परं ब्रह्म (अस्ति) ।

**संस्कृतव्याख्या**- य: शकटस्य शकटासुरस्य, हन्ता विनाशक:, य: च गोपीनां व्रजबालानां, हर्षवर्द्धन: आनन्ददायी, स च देव: दिव्यात्मा, कृष्ण: वासुदेव:, इत्यभिधानत: इति नाम्ना, परं ब्रह्म परमात्मा एव (अस्ति)।

शकटासुरव्यापादक: गोपीजनचित्ताह्लादक: श्रीकृष्णस्तु साक्षात् परमात्मा एवास्ति इति भाव:।

**भाषार्थ:**- बचपन में ही जिह्नों ने शकटासुर को मार दिया था और जो गोपबालाओं के दिल को हमेशा खुश करने वाले हैं, वही दिव्यपुरुष श्रीकृष्ण के रूप में साक्षात् परमात्मा ही हैं।

**पूतना मृत्युमासाद्य यतो मोक्षमवाप सा।**
**स्मरणीयोऽनिशं देव: स दुष्टेऽपि कृपानिधि: ।। 15 ।।**

**अन्वय:**- सा पूतना यत: मृत्युम् आसाद्य मोक्षम् अवाप, दुष्टेऽपि कृपानिधि: स देव: अनिशं स्मरणीय: ।

**संस्कृतव्याख्या**– सा पूतना एतन्नामधेया काचिद् राक्षसी, यतः यस्मात् श्रीकृष्णात् मृत्युं यमलोकम्, आसाद्य संप्राप्य, मोक्षं मुक्तिम् अवाप लेभे। दुष्टेऽपि दुर्जनेऽपि, कृपानिधिः करुणासागरः, स देवः भगवान्, अनिशं सततं, स्मरणीयः ध्येयः।

पूतनाहन्ता दुर्जनेऽपि कृपावान् श्रीकृष्णः सततं सकलध्येय इति भावः।

**भाषार्थः**– पूतना राक्षसी ने जिस श्रीकृष्ण के कारण मृत्यु को प्राप्त कर भी मोक्षगति को प्राप्त किया, इस प्रकार दुष्ट पर भी दया के सागर बनने वाले वह भगवान् श्री कृष्ण हमेशा स्मरणीय हैं।

**तृणावर्त्तो हतो येन तृणवद्बालरूपिणा।**
**मातोरसि लुठन्तं तमादायानन्दमाययौ ।। 16 ।।**

**अन्वनः**– तृणवद्बालरूपिणा येन तृणावर्त्तो हतः, उरसि लुठन्तं तम् आदाय माता आनन्दम् आययौ।

**संस्कृतव्याख्या**– तृणबद्बालरूपिणा तृणवद् शष्पवद् (कोमलाङ्गेन) बालरूपिणा शिशुस्वरूपकेण, ''शष्पं बालतृणम्'' इत्यमरः। येन माधवेन, तृणावर्त्तः एतन्नामधेयोऽसुरः हतः व्यापदितः, उरसि वक्षसि, तं श्रीकृष्णम् आदाय गृहीत्वा, माता यशोदा, आनन्दं नन्दं यावत् हर्षपूर्वकं वा, आययौ आ समन्तात् ययौ गतवती।

पद्येऽस्मिन् ''तृण'' इति व्यञ्जनसमूहस्य द्विरुचार्यत्वादनुप्रासः, अपि च ''आनन्दम्'' इत्यत्र श्लेषोऽलङ्कारः। एतल्लक्षणं यथा–

''**श्लिष्टैपदैरनेकार्थभिधाने श्लेष इष्यते** '' **इति।** (सा.द. 10/11)

तृणावर्त्तनामधेयं राक्षसं शिशुः वासुदेवः श्रीकृष्णः अनायासेनैव जघानेति भावः।

**भाषार्थः**– शिशु अवस्था में तिनके की तरह कोमल जिस श्रीकृष्ण ने तृणावर्त्त जिस का नाम है ऐसे राक्षस को मार गिराया, सीने पर लोटने वाले

उस बालकृष्ण को गोदी में लेती हुई माता यशोदा नन्दबाबा के पास जा पहुंची।

**बालमव्यक्तकर्माणं बालोपेतं विलोक्य तम्।**
**बकस्तुण्डेन जग्राह तरसा क्रोधनो बली ।। 17।।**

**अन्वयः**– अव्यक्तकर्माणं तं बालं बालोपेतं विलोक्य क्रोधनः बली वकः तरसा तुण्डेन जग्राह ।

**संस्कृतव्याख्या**– अव्यक्तकर्माणं अव्यक्तं नाम प्रकटयितुमशक्यं कर्म आचरणं यस्य तं, तं सुप्रसिद्धं, बालं शिशुरूपधारिणं केशवं, बालोपेतं बालैः शिशुभिः उपेतं युक्तं, विलोक्य दृष्ट्वा, क्रोधनः कोपवान्, बली पराक्रमशाली, बकः वकासुरः, तरसा झटित्येव, तुण्डेन चञ्चूपुटेन, जग्राह आदधे। तदत्रानुप्रासोऽलंकारः।

अवाच्यकर्मकर्त्तारं तं श्रीकृष्णं शिशुभिः साकं क्रीडन्तमवलोक्य पराक्रमी वकासुरः तत्कालमेव स्वचञ्चुपुटेन स्वीचकारेति भावः।

**भाषार्थः**– अलौकिक कर्म के रचयिता उस भगवान् श्रीकृष्ण को बच्चों के ही साथ देख कर पराक्रमी वकासुर ने अपने चोंच से उठा लिया ।

**दहन्तमग्निवत्तुण्डं स तत्याजासुरद्रुहम्।**
**गृहीत्वा तं स तुण्डेन द्विधा चक्रे सुरोत्तमः ।। 18।।**

**अन्वयः**– अग्निवत् तुण्डं दहन्तम् असुरद्रुहं सः तत्याज। स सुरोत्तमः तं तुण्डेन गृहीत्वा द्विधा चक्रे।

**संस्कृतव्याख्या**– अग्निवत् वह्निरिव तुण्डं मुखं ''वक्त्रास्ये वदनं तुण्डमाननं लपनं मुखम्'' इत्यमरः। दहन्तं च्वलयन्तं, असुरद्रुहम् असुराय दैत्याय द्रुह्यति यः तम्, श्रीकृष्णमित्यर्थः। सः वकासुरः, तत्याज मुमोच । स सुरोत्तमः सुराणां सुरेषु वा उत्तमः सुरोत्तमः नाम देवाधिपतिः तं दैत्यं, तुण्डेन मुखेन, गृहीत्वा आदाय, द्विधा द्विफालं,चक्रे विदधे।

श्रीकृष्णः वकासुरं जघानेत्यर्थः।

**भाषार्थः**– आग के समान मुख के अन्दर जलाने वाले श्रीकृष्ण को उस वकासुर ने अपने चोंच से बाहर छोड़ दिया । भगवान् श्रीकृष्ण ने उस वकासुर को अपने मुंह से दो खण्ड कर डाला।

**चारयन्तं सरित्तीरे वत्सान् बालमरिद्रुहम्।**
**वत्सासुरोऽभ्यगात्तत्र ज्ञात्वा गोपालनन्दनम् ।। 19।।**

**अन्वयः**– सरित्तीरे वत्सान् चारयन्तं अरिद्रुहं गोपालनन्दनं बालं ज्ञात्वा वत्सासुरः तत्र अभ्यगात्।

**संस्कृतव्याख्या**– सरित्तीरे सरितः नद्याः तीरे तटे, वत्सान् वात्सकान् धेनूः वा, ''वत्सधेन्वोर्वात्सक धैनुके '' इत्यमरः। चारयन्तं गोचारणकर्मणि प्रवृत्तम् अरिद्रुहं शत्रुविनाशकं, गोपालनन्दनं वासुदेवं, बालं शिशुमिति , ज्ञात्वा मत्वा, वत्सासुरः एतन्नामधेयोऽसुरः, तत्र तत्स्थानम्, अभ्यगात् अधिजगाम।

नदीतटे गोचारणकर्मप्रवृत्तं भगवन्तं श्रीकृष्णं शिशुरेवायमिति मत्वा वत्सासुरनामधेयः दैत्यः तत्समीपे प्राप्तवान् इति भावः।

**भाषार्थः**– नदी के किनारे गाय चराने वाले श्रीकृष्ण को एक बच्चा मात्र समझकर वत्सासुर उन के पास जा पहुंचा।

**गृहीत्वा परपादौ तं भ्रामयित्वा व्यपोथयत्।**
**हरिः शिलायां स तदा गतासुरभवद्बकः ।। 20।।**

**अन्वयः**– हरिः परपादौ गृहीत्वा तं भ्रामयित्वा शिलायां व्यपोथयत्। तदा सः बकः गतासुः अभवत्।

**संस्कृतव्याख्या**– हरिः माधवः परपादौ पृष्ठभागस्थचरणौ, गृहीत्वा आदाय, तं वत्सासुरं, भ्रामयित्वा घूर्णयित्वा, शिलायां प्रस्तरतले, व्यपोथयत् अताडयत्, (वि उपसर्गपूर्वकात् 'पुथ' हिंसायामिति धातोः णिचि लङि)। तदा तस्मिन्नेव काले, सः वत्सासुराख्यः दैत्यः, बकः धूर्त्तः, गतासुः गता दिवङ्गताः असवः प्राणाः यस्य सः (बहुब्रीहिः) निर्जीवः, अभवत् संजातः ।

हरिः वत्सासुरस्य पृष्ठभागस्थचरणौ धृत्वा तं प्रस्तरे एव अताडयत्, येनाऽसौ दैत्यः स्वप्राणान् तत्याजेति भावः।

**भाषार्थः**- भगवान् श्रीकृष्ण ने वत्सासुर के पीछे के दोनों पैर पकड़कर घुमाते हुए उसे पत्थर पर पटक कर मार डाला।

**क्षेपयन्तं विषाणाभ्यां सरित्तीरमभीरुवत्।**
**ज्ञात्वा वृषासुरं कृष्णो हन्तुमभ्यागतः पुरः ।। 21।।**

**अन्वयः**- अभीरुवत् विषाणाभ्यां सरित्तीरं क्षेपयन्तं वृषासुरं ज्ञात्वा कृष्णः (तं) हन्तुं पुरः अभ्यागतः।

**संस्कृतव्याख्या**- न भीरुः अभीरुः तद् वन् नाम निर्भीक इव, विषाणाभ्यां शृङ्गाभ्यां सरित्तीरं नदीतटं, क्षेपयन्तं ताडयन्तं वृषासुरम् एतन्नामधेयं राक्षसं, ज्ञात्वा अवबुध्य, कृष्णः वासुदेवः, (तं) हन्तुं व्यापादयितुं, पुरः समक्षमेव अभ्यागतः प्राप्तवान्। तदत्रोत्प्रेक्षाऽलंकारः ।

स्वशृङ्गाभ्यां नदीं ताडयन्तं वृषासुरमवलोक्य श्रीकृष्णस्तत्पुरतः समाययौ इति भावः।

**भाषार्थः**- वृषासुर नाम का राक्षस अपने सींगों से प्रहार करते हुए नदी के किनारे आ पहुंचा । ऐसा लग रहा था जैसा कि उसे किसी से भय न हो। उसे एक दैत्य जानकर भगवान् श्रीकृष्ण मारने के उद्देश्य से उस के समक्ष जा पहुंचे।

**गृहीतोत्खातशृङ्गाभ्यां व्यहनत्तं रुषा हरिः ।**
**गतासुरभवत् सोऽथ पुष्पवृष्टिरभूद्दिवः ।। 22।।**

**अन्वयः**- हरिः रुषा गृहीतोत्खातशृङ्गाभ्यां तं व्यहनत्। अथ सः गतासुः अभवत्, दिवः पुष्पवृष्टिः अभूत्।

**संस्कृतव्याख्या**- हरिः भगवान् श्रीकृष्णः, रुषा क्रोधेन, गृहीतोत्खातशृङ्गाभ्यां गृहीतौ च उत्खातौ च शृङ्गौ गृहीतोत्खातशृङ्गौ ताभ्यां

गृहीतोत्खातशृङ्गाभ्याम् अवधृतोत्पाटितविषाणाभ्यां, तं वृषासुरं, व्यहनत् जघान, सः दानवः, गतासुः निर्गतप्राणवायुः, अभवत् संजातः, अथ अनन्तरं तद्विनशनात्परं, दिवः स्वर्गात्, पुष्पवृष्टिः कुसुमवर्षणम्, अभूत्।

भगवान् श्रीकृष्णः कोपेनैव तस्य वृषासुरस्य शृङ्गोत्पाटनपूर्वकं तं जघान। येन तस्य मृत्युः संजातः, देवैश्च स्वर्गात् पुष्पवृष्टिः कारिता इति भावः।

**भाषार्थः**- भगवान् श्रीकृष्ण ने गुस्से में ही वृषासुर के दोनों सींग उखाड़कर उसे मार डाला। उस दैत्य का विनाश हो जाने पर स्वर्ग से पुष्प की बारिस होने लगी।

**अथो जिगमिषा तेषां जाता वृन्दावनं प्रति ।**
**मृत्युना किल भीतानां गोपानां कृष्णचेतसाम् ।। 23।।**

**अन्वयः**- अथो किल मृत्युना भीतानां कृष्णचेतसां तेषां गोपानां वृन्दावनं प्रति जिगमिषा जाता।

**संस्कृतव्याख्या**- अथो अनन्तरं किल पादपूर्त्यात्मकोऽव्ययोऽयं, मृत्युना कालेन, भीतानां त्रस्तानां, कृष्णचेतसां कृष्णाय एव समर्पितात्मनां, भगवद्हृदयानामित्यर्थः, तेषां गोपानां ब्रजवासिनां, वृन्दावनं प्रति एतन्नामधेयं प्राकृतिकं सुरम्यं स्थानं प्रति, जिगमिषा गन्तुं चलितुम् इच्छा अभिलाषः आकांक्षा वा, जाता।

एकदा मृत्युसन्त्रस्तानां कृष्णभक्तानां गोपवासिनां वृन्दावनं प्रति जिगमिषाऽभवत् इति भावः।

**भाषार्थः**- इस के पश्चात् मृत्यु से डरे हुए कृष्ण के भक्त गोपवासियों को वृन्दावन में जाने की इच्छा हुई।

**आरुह्य शकटान् जग्मू रामकृष्णपुरोगमाः।**
**गायन्त्यः कृष्णचरितं गोप्यः शुशुभिरेऽध्वनि ।। 24।।**

**अन्वयः**- रामकृष्णपुरोगमाः (गोपाः) शकटान् आरुह्य जग्मुः। अध्वनि कृष्णचरितं गायन्त्यः गोप्यः शुशुभिरे।

**संस्कृतव्याख्या**- रामकृष्णपुरोगमाः रामश्च बलरामश्च कृष्णश्च वासुदेवश्च रामकृष्णौ तयोः पुरोगमनं पूर्वगमनं येषां ते (गोपाः), शकटान् बलीवर्दयानादि, आरुह्य अवलम्ब्य, जग्मुः ययुः। अध्वनि मार्गे, कृष्णचरितं माधवगुणग्रामं, गायन्त्यः स्तुवन्त्यः, गोप्यः गोपाङ्गनाः, शुशुभिरे रेजिरे।

रामकृष्णपुरस्सराः गोपाः शकटान् आरुह्य वृन्दावनं प्रति ययुः, गोपाङ्गनाश्च मार्ग एव कृष्णगुणगानं चक्रुरिति भावः।

**भाषार्थः**- बलराम एवं श्रीकृष्ण को सामने करते हुए गोपवासियों ने बैलगाड़ी पर बैठकर वृन्दावन की ओर अपनी यात्रा प्रारम्भ की। रास्ते में ही श्रीकृष्ण के चरित्र का गान करती हुई गोपाङ्गनाएं सुशोभित होने लगी।

**ततो वृन्दावनं प्राप्ताः चक्रीकृत्य च सर्वतः।**
**शकटान् न्यवसन् सर्वे मुदा प्राप्तश्रियो वने ।। 25।।**

**अन्वयः**- ततः सर्वतः चक्रीकृत्य वृन्दावनं प्राप्ताः। सर्वे मुदा प्राप्तश्रियः वने शकटान् न्यवसन्।

**संस्कृतव्याख्या**- ततः तदनन्तरं, सर्वतः चतुःपार्श्वेभ्यः, चक्रीकृत्य मण्डलीकृत्य, वृन्दावनं वृन्दारण्यं, प्राप्ताः अधिगताः, सर्वे गोपाः, मुदा प्रसन्नचेतसा, प्राप्तश्रियः सुशोभिताः सन्तः, वने अरण्ये, शकटान् वलीवर्दयानानि, न्यवसन् अधिश्रितवन्तः।

सर्वेऽपि गोपाः वृन्दावनं सम्प्राप्य हर्षितहृदयेन तत्र शकटेषु एव स्ववसतिं चक्रुरिति भावः।

**भाषार्थः**- सभी ब्रजवासियों ने वृन्दावन में पहुंच कर अत्यधिक प्रसन्नता पूर्वक चारों ओर से घेरा बना कर बैलगाडियों पर ही अपना निवास स्थान बनाया।

**रामकृष्णावुभौ तत्र रेमाते परया मुदा।**
**गोपाः सबालाःसस्त्रीका गावो वत्साश्च रेमिरे ।। 26 ।।**

**अन्वयः**– तत्र उभौ रामकृष्णौ परया मुदा रेमाते, सबालाः सस्त्रीकाः गोपाः गावः वत्साश्च रेमिरे।

**संस्कृतव्याख्या**– तत्र वृन्दावने, उभौ द्वौ, रामकृष्णौ बलरामवासुदेवौ, परया मुदा आनन्दातिरेकेण, रेमाते चिक्रीडतुः, सबालाः बालैः शिशुभिः सह युक्ताः, सस्त्रीकाः सपत्नीकाः, गोपाः गोपालकाः गावः धेनवः, वत्साश्च वात्सकाश्च, रेमिरे चिक्रीडुः।

तस्मिन् वृन्दावने बलरामकृष्णौ सानन्दं क्रीडयामासतुः, सपत्नीकाः सबालाः गोपाः धेनवश्च सानन्दं क्रीडयामासतुरिति भावः।

**भाषार्थः**– उस वृन्दावन में दानों बलराम एवं श्रीकृष्ण ने आनन्दपूर्वक विचरण किया। गोपवासियों ने भी अपनी पत्नियों एवं बच्चों तथा गाय, बछड़ों के साथ सानन्द विचरण किया।

**चलत्तरङ्गनिचया कदम्बतरुशोभिता।**
**प्रफुल्लेन्दीवरश्यामा यमुना तत्र राजते ।। 27 ।।**

**अन्वयः**– तत्र कदम्बतरुशोभिता चलत्तरङ्गनिचया प्रफुल्लेन्दीवरश्यामा यमुना राजते।

**संस्कृतव्याख्या**– तत्र वृन्दावने, कदम्बतरुशोभिता कदम्बाख्यैस्तरुभिः शोभिता अलंकृता या सा चलत्तरङ्गनिचया चलताम् आलोडितानां तरङ्गाणाम् ऊर्मीणां निचयः समूहः यस्यां सा, प्रफुल्लेन्दीवरश्यामा प्रफुल्लैः विकसितैः इन्दीवरैः नीलकमलैः श्यामा कृष्णाभा या सा, यमुना कालिन्दी, राजते शोभते।

वृन्दावने कदम्बवृक्षैः कमलदलैश्च समलङ्कृता चञ्चलतरङ्गैः कलकलनिनादिनी यमुना सुशोभते इति भावः।

**भाषार्थः**– उस वृन्दावन में कदम्ब के पेडों से अलंकृत चञ्चल लहरों से युक्त नीकमलों से नीलाभ यमुना नदी सुशोभित है।

**कृष्णः कमलपत्राक्षो विजहार सरित्तटे।**
**गोपीनां वेणुनादेन व्यहरत् सुमना मनः ।। 28 ।।**

**अन्वयः**– कमलपत्राक्षः कृष्णः सरित्तटे विजहार, सुमना (सः) वेणुनादेन गोपीनां मनः व्यहरत्।

**संस्कृतव्याख्या**– कमलपत्राक्षः कमलपत्रस्येव पङ्कजदलस्येव अक्षिणी नेत्रे यस्य सः, कृष्णः वासुदेवः, सरित्तरे नदीतीरे नाम यमुनानद्याः तटे विजहार रेमे (वि+हृ+लिट् लकारस्यैकवचनम्), सुमना सु शोभनः मनः चेतः यस्य सः (कृष्णः) (सः) वेणुनादेन वंशीस्वनेन, गोपीनां गोपाङ्गनानां, मनः चेतः, व्यहरत् जहार।

यमुनानद्याः तटे रममाणः श्रीकृष्णः वंशीनिनादेन ब्रजसुन्दरीणां चेतः प्रसादयामासेति भावः।

**भाषार्थः**– कमल नयन श्रीकृष्ण ने यमुना के तट पर रमण किया, साथ ही उन्होंने वंशीवादन कर गोपिकाओं के मन को हर लिया।

**एकदा सहितो बालैर्दूरं गाश्चारयन् गतः ।**
**पीतवासा घनश्यामो यत्रास्ते कालियः फणी ।। 29 ।।**

**अन्वयः**– एकदा बालैः सहितः पीतवासा घनश्यामः गाः चारयन् दूरं गतः, यत्र कालियः फणी आस्ते।

**संस्कृतव्याख्या**– एकदा कस्मिंश्चिद्दिने, बालैः शिशुभिः, सहितः साकं मिलितः पीतवासा पीताम्बरः, घनश्यामः घन मेघ इव श्यामः कृष्णः, श्रीकृष्ण इत्यर्थः। गाः धेनूः, चारयन् तृणानि खादयन् दूरं विप्रकृष्टं, गतः यातः, यत्र यस्मिन् स्थाने, कालियः फणी कालिय इत्याख्यः नागः, आस्ते निवसति।

कदाचिद् बालकैः सह मिलित्वा श्रीकृष्णः गोचारणपूर्वकं बहुदूरमगात्, यत्र खलु कालियसर्पः निवसतीति भावः।

**भाषार्थः**– एक दिन श्रीकृष्ण बच्चों के साथ मिलकर गाय चराते हुए बहुत दूर चले गये, जहां कालिय नाम का सर्पराज रहता है।

**विषाग्निना च्वलद्वारि सफेनं बुद्बुदायते।**
**तद्वायुस्पर्शतो व्योम्नः पतन्ति विहगा ह्रदे ।। 30 ।।**

**अन्वयः**- विषाग्निना च्वलद्वारि सफेनं बुद्बुदायने। तद्वायुस्पर्शतः व्योम्नः विहगाः ह्रदे पतन्ति।

**संस्कृतव्याख्या**- विषाग्निना सर्पस्य कालियस्य हालाहालवह्निना च्वलद्वारि दहज्जलं, सफेनं सफेनकं, बुद्बुदायते अर्बुदायते। तद्वायुस्पर्शतः विषयुक्ततज्जलसम्पर्कितसमीरणसंसर्गेण, व्योम्नः नभसः, विहगाः पक्षिणः, ह्रदे कृत्रिमजलाशये, पतन्ति अवपतन्ति।

कालियनागस्य विषेण ह्रदस्थं जलं विषायते, तत्सम्पर्कितवायुना आकाशेऽपि उड्डीयमानाः पक्षिणः मूर्च्छिताः तद्ह्रदे निपतन्ति इति भावः।

**भाषार्थः**- कालिय के जहर के कारण उस ह्रद का पानी जहरीला हो गया है। जिस के सम्पर्क से जहरीले वायु के कारण आकाश में उड़ने वाले पक्षी भी उस ह्रद में गिर जाते हैं।

**परिधानं दृढं बध्वा कदम्बमधिरुह्य सः।**
**पपातोपरितः कृष्णः स यत्रास्ते महानहिः ।। 31 ।।**

**अन्वयः**- यत्र सः महान् अहिः आस्ते, (तत्र) सः कृष्णः परिधानं दृढं बध्वा कदम्बम् अधिरुह्य उपरितः पपात।

**संस्कृतव्याख्या**- यत्र यस्मिन्ह्रदे, सः महान् विशालकायः, अहिः सर्पः (कालियः), आस्ते निवसति, (तत्र), सः कृष्णः देवकीनन्दनः, परिधानं वस्त्रं, दृढं सशक्तं, बध्वा ग्रन्थीकृत्य, कदम्बम् एतत्संज्ञकं वृक्षम्, अधिरुह्य आरुह्य, उपरितः उर्ध्वदेशात्, पपात आक्रमणं चकार चुकूर्दे वा।

भगवान् श्रीकृष्णः कदम्बतरुमारुह्य ह्रदे निवसतः कालियनागस्योपरि उपरिस्ताच्चुकूर्दे इति भावः।

**भाषार्थः**- वासुदेव श्रीकृष्ण ने अपने पहने हुये कपड़ों को मजबूती से बांध कर कदम्ब के पेड़ पर चढ़कर ह्रद में अवस्थित कालिय नाग के ऊपर छलांग लगाया।

**कूर्द्दनोत्थजलेनाशु प्लावितास्तटभूमयः।**
**विहरन्तं हरिं दृष्ट्वा नागपत्न्योऽवदन् रुषा ।।32।।**

**अन्वयः**- कूर्द्दनोत्थजलेन तटभूमयः आशु प्लाविताः, विहरन्तं हरिं दृष्ट्वा नागपत्न्यः रुषा अवदन्।

**संस्कृतव्याख्या**- कूर्द्दनोत्थजलेन कूर्द्दनेन उत्पतनेन उत्थितम् उपरि आगतं यत् जलं वारि तेन, तटभूमयः कूलस्थभूभागाः, आशु तत्कालमेव, प्लाविताः जलमग्नाः संजाताः निमज्जिताः वा। विहरन्तं सन्तरन्तं, हरिं श्रीकृष्णं दृष्ट्वा अवलोक्य, नागपत्न्यः कालियस्त्रियः, रुषा कोपेन, अवदन् अकथयन्, श्रीकृष्णस्य कूर्द्दनेन ह्रदस्थं जलं तटभूमिमुल्लङ्घितम्, ह्रदे सन्तरन्तं तं कृष्णं दृष्ट्वा नागाङ्गनाः सकोपमूचुरिति भावः।

**भाषार्थः**- ह्रद में छलांग लगाने से तटप्रदेश जलमग्न हो गया, उस समय जल विहार करते हुए श्रीकृष्ण को देख कर कालिय नाग की पत्नियों ने गुस्से में कहा।

**गच्छ गच्छाशु रे बाल दन्दशूकोऽस्ति दुष्टधीः ।**
**तरसा तत उत्थाय भोगी भोगेन चावृणोत् ।।33।।**

**अन्वयः**- रे बाल! आशु गच्छ गच्छ ।(यतो ह्यत्र) दुष्टधीः दन्दशूकः अस्ति। ततः भोगी तरसा उत्थाय भोगेन च (तम्) अवृणोत्।

**संस्कृतव्याख्या**- नागपत्न्यः अकथयन् यद् रे बाल! हे शिशो! आशु यथा शीघ्रं, (त्वं) गच्छ गच्छ इतो याहि। (यतो ह्यत्र) दन्दशूकः उत्पाती, विषदन्तः सर्पः वा दुष्टधीः दुर्मतिः, अस्ति तिष्ठति। ततः तदनन्तरं भोगी भोगोऽस्यास्ति इति भोगिन्, सर्पः कालियः, तरसा त्वरितमेव, उत्थाय दण्डायमानो भूत्वा, भोगेन फणेन, च (तं श्रीकृष्णम्) अवृणोत् अचिनोत्

अच्छादयद्वा। ''दर्वीकरो दीर्घपृष्ठो दन्दशूको बिलेशय:, उरग: पन्नग: भोगी जिह्मग: पवनाशन: '' इत्यमर:।

नागपत्नीभि: दुष्टकालियसर्पात् सावधानीकृतोऽपि श्रीकृष्ण: तत्कालमेव कालियेन स्वफणेनावधृत इति भाव:।

**भाषार्थ:**- नागपत्नियों ने श्रीकृष्ण से सावधान करते हुए कहा कि, रे बालक! तुम यहां से चले जाओ, क्योंकि यहां दुष्ट कालिय नाग निवास करता है। इतना कहते ही कालिय ने अपने फन से श्रीकृष्ण को जकड़ लिया।

**शरीरशक्त्या नि:सार्य गृहीत्वाऽभ्रामयद्धरि:।**
**क्षीणशक्तिं परित्यच्य तत्फणासु ननर्त्त स: ।। 34।।**

**अन्वय:**- शरीरशक्त्या नि:सार्य (तं) गृहीत्वा हरि: अभ्रामयत्। क्षीणशक्तिं परित्यच्य स: तत्फणासु ननर्त्त।

**संस्कृतव्याख्या**- शरीरशक्त्या स्वदेहसामर्थ्येन, नि:सार्य तद्बन्धनादात्मानं विमोच्य, (तं) गृहीत्वा आधाय हरि: श्रीकृष्ण:, अभ्रामयत् अघूर्णयत्। क्षीणशक्तिं शक्तिहीनतां, परित्यच्य अवधूय, स: कृष्ण:, तत्फणासु तस्य कालियस्य फणासु भोगेषु, ननर्त्त नृत्यं चकार।

श्रीकृष्ण: स्वशरीरबलेन सर्पस्य बन्धनादात्मानमुन्मुच्य बलपूर्वकं तद्भोगोपरि नृत्यं चकारेति भाव:।

**भाषार्थ:**- श्रीकृष्ण ने अपनी ताकत से कालिय के बन्धन को हटाकर उसे पकड़कर घुमाया और बलपूर्वक उसके फनों पर नाचना प्रारम्भ किया।

**तत्त्वं तत्त्वं ततस्तत्त्वं तत्त्वतस्तत्त्वतस्तु तत् ।**
**ततं तेन ततं तेन मृदङ्गध्वनितोऽभवत् ।। 35।।**

**अन्वय:**- तत्त्वं तत्त्वं तत: तत्त्वं, तत्त्वत: तु तत् तत्त्वत: (एव)। ततं तेन ततं तेन (इति) मृदङ्ग: ध्वनितोऽभवत्।

**संस्कृतव्याख्या**– तत्त्वं तत्त्वम् इति वाद्ययन्त्रस्य तालविशेषः पक्षे तु तत् नाम स एव परमात्मा त्वं नाम जीवात्मा इति वेदान्तदर्शनप्रतिपाद्यम्, ततः तदनन्तरमपि तत्त्वम्। तत्त्वतः वस्तुतः तु तत् नृत्यं, तत्त्वत एव याथार्थिकमेव। ततं तारयुक्तं वाद्यं तेन श्रीकृष्णेन वादितम्, ततं तेन इति एवं मृदङ्गः वाद्ययन्त्रविशेषः मुरजः इति, ''मृदङ्गा मुरजाः'' इत्यमरः। ध्वनितः शब्दायितः, अभवत् संजातः, कालियस्य फनोपरि श्रीकृष्णस्य नृत्यं तारयुक्तं वाद्यध्वनिं मृदङ्गध्वनिं च अजनयत इति भावः।

**भाषार्थः**– तत्त्वं, तत्त्वम् इस तालविशेष के साथ श्रीकृष्ण ने कालिय के फन के ऊपर नृत्य किया, जिस से तारयुक्त वाद्ययन्त्र की ध्वनि व मृदङ्ग की ध्वनि उत्पन्न होने लगी।

**नृत्यति स्म हरिः साक्षादहेर्मूर्द्धसु दर्पहा।**
**नताननः स्तुवन्नासीद्देवदेवं जगत्पतिम् ।। 36 ।।**

**अन्वयः**– दर्पहा साक्षात् हरिः अहेः मूर्धसु नृत्यति स्म, नताननः (सः) देवदेवं जगत्पतिं स्तुवन् आसीत्।

**संस्कृतव्याख्या**– दर्पहा दर्पं हन्तीति दर्पहा गर्वभञ्जनः दर्पदलनो वा, साक्षात् मूर्त्तिमान्, हरिः विष्णुः श्रीकृष्णः अहेः सर्पस्य, मूर्धसु शिरस्सु, नृत्यति स्म नृत्यं चकार, नताननः नतानि आननानि यस्य सः नताननः अधोमुखः, सन् सः हरिः, देवदेवं देवानां अमराणां देवः सुरः यः तं देवाधिपतिमित्यर्थः। ''अमराः निर्जराः देवाः'' इत्यमरः। जगत्पतिं जगतः संसारस्य पतिं स्वामिनं, स्तुवन् प्रार्थयन्, आसीत्।

यदा दर्पभञ्जनकारी श्रीकृष्णः कालियस्योपरि नृत्यति स्म तदा कालियः तं श्रीकृष्णं स्तौति स्म इति भावः।

**भाषार्थः**– घमण्ड को नष्ट करने वाले साक्षात् विष्णुरूपधारी श्रीकृष्ण ने कालिय नाग के मस्तकों पर नृत्य किया, कालिय ने भी अपने माथे झुका कर जगदीश्वर श्रीकृष्ण की स्तुति की।

**तव पादतलाघातैः पूतोऽस्मि भगवन् हरे !।**
**गङ्गाया उद्भवो याभ्यां नतोऽस्मि प्रणतोऽस्मि तौ ।। 37 ।।**

**अन्वयः**– (हे) भगवन् हरे ! तव पादतलाघातैः पूतोऽस्मि। याभ्यां गङ्गाया उद्‌भवः। (अहं) तौ नतोऽस्मि प्रणतोऽस्मि।

**संस्कृतव्याख्या**– (हे) भगवन् परमेश्वर!, हरे बिष्णो !, तव भवतः, पादतलाघातैः चरणतलप्रहारैः, (अहं) पूतोऽस्मि पवित्रितोऽस्मि। याभ्यां त्वच्चरणाभ्यां, गङ्गायाः भागीरथ्याः, उद्‌भवः जनिः (अभूत्), (अहं) तौ चरणौ, नतोऽस्मि प्रणतोऽस्मि वन्दे।

सर्पराजः कालियः भगवन्तं श्रीकृष्णं स्तुवन् अकथयत् यदहं ते चरणाघातेन नितरां पवित्रितोऽस्मीति हेतोः गङ्गोत्पत्तिकारकौ त्वच्चरणौ नतेन शिरसा वन्दे इति भावः।

**भाषार्थः**– कालियनाग ने श्रीकृष्ण की स्तुति करते हुए कहा कि हे जगदीश्वर मैं आप के चरणों के ताड़न से पवित्रित हो गया हूँ। आप के जिन चरणों से पवित्र गङ्गा की उत्पत्ति हुई है, मैं उन चरणों को प्रणाम करता हूँ।

**जगज्जनिरभूद्यस्मात्तन्मध्ये दुष्टधीरहम्।**
**पालनीयोऽस्मि भवता मदीय इति बुद्धितः ।। 38 ।।**

**अन्वयः**– यस्मात् जगज्जनिः अभूत्, तन्मध्ये अहं दुष्टधीः (अस्मि)। मदीय इति बुद्धितः (अहं) भवता पालनीयः अस्मि।

**संस्कृतव्याख्या**– यस्मात् यतः परमात्मनः, जगज्जनिः जगतः संसारस्य, जनिः जन्म, उत्पत्तिर्वा, अभूत् अभवत्, तन्मध्ये तस्मिन् संसारे जगति वा, अहं कालियः, दुष्टधीः दुष्टा दुर्गतिमधिगता धीः बुद्धिः यस्य सः दुर्बुद्धिरित्यर्थः (अस्मि)। मदीय अस्मदीय, इति एवं, बुद्धितः ज्ञानेन, (अहं) भवता त्वया श्रीकृष्णेन पालनीय रक्षणीयः, अस्मि भवामि ।

यस्मात्परमेश्वरात्समग्रः संसारः जनिं लेभे, तत्राहं कालियः दुष्टबुद्धिरस्मि इत्यत्यन्तमशोभनीयं तथ्यम्। परन्त्वहं भवता अस्मदीय इति मत्वा नितरां क्षन्तव्योऽस्मीति भावः।

**भाषार्थः-** कालिय ने श्रीकृष्णे से स्तुति करते हुए कहा कि जिस परमपुरुष से समग्र संसार की उत्पत्ति हुई है, उसमें मेरे जैसे एक दुष्ट बुद्धि ने जन्म लिया है, फिर भी मैं आपका अपना ऐसा समझ कर आप मुझे क्षमा कर देवें।

**नागपत्न्योऽस्तुवन् देवं दण्डवत् पतिताः पुरः ।**
**अश्रुमुख्यो नतग्रीवाः कृताब्जकरसम्पुटाः ।। 39 ।।**

**अन्वयः-** अश्रुमुख्यः नतग्रीवाः कृताब्जकरसंपुटाः दण्डवत् पुरः पतिताः नागपत्न्यः देवम् अस्तुवन्।

**संस्कृतव्याख्या-** अश्रुमुख्यः अश्रुभिः नेत्रजलैः प्लावितानि मुखानि आननानि यासां ताः, कृताब्जकरसंपुटाः अब्ज इव कमल इव करैः हस्ताग्रैः कृतः विहितः संपुटः अञ्जलिः याभिः ताः विहिताञ्जल्य इत्यर्थः। नतग्रीवाः नता अधोकारिता ग्रीवा कन्धरा याभिः ताः, ''अथ ग्रीवायां शिरोधिः कंधरेत्यपि'' इत्यमरः। दण्डवत् दण्डाकारेण, पुरःसमक्षं, पतिताः भूतललुण्ठिताः, नागपत्न्यः नागस्य कालियसर्पस्य पत्न्यः ललनाः , देवं श्रीकृष्णम् अस्तुवन् स्तुतिं चक्रुः।

अश्रुपूर्णाकुलितवदनाः नागस्त्रियः करबद्धपूर्वकं प्रणामं कुर्वत्यः सत्यः भगवन्तं श्रीकृष्णं प्रार्थयाञ्चक्रुरिति भावः ।

**भाषार्थः-** आंसू बहाती हुई गर्दन झुकाती हुई नागपत्नियों ने हाथ जोड़ कर दण्डवत् प्रणाम कर के श्रीकृष्ण की स्तुति की।

**नमस्ते जगन्नाथ भूयो नमस्ते**
**मुखेन्दो प्रसीदाशु भृत्ये नमस्ते।**
**वयं दासदास्यो भवामस्त्वदीयाः**
**त्वदीयाङ्घ्रिपद्मं नतास्मो नतास्मः ।। 40 ।।**

**अन्वयः**– (हे) जगन्नाथ ! ते नमः, ते भूयो नमः। (हे) मुखेन्दो भृत्ये आशु प्रसीद,ते नमः। वयं त्वदीयाः दासदास्यः भवामः। त्वदीयाङ्घ्रिपद्मं नताः स्मः नताः स्मः।

**संस्कृस्तव्याख्या**– (हे) जगन्नाथ जगतः संसारस्य नाथ ईश्वरः प्रभुर्वा तत्सम्बोधने, ते तुभ्यं, नमः प्रणामः, ते तुभ्यं, भूयो बारम्बारं, नमः प्रणामः । (हे) मुखेन्दो मुखं नाम आननम् एव इन्दुः चन्द्रः यस्य सः तत्सम्बोधने, भृत्ये सेवके (कालियनागे), आशु शीघ्रमेव, प्रसीद प्रसन्नो भव। ते नमोऽस्तु। वयं नागपत्न्यः, त्वदीयाः भवदीयाः, दासदास्यः सेविकाः, भवामः स्मः। त्वदीयाङ्घ्रिपद्मं भवतः चरणकमलं, नतास्मः प्रणमामः। नतास्मः प्रणमामः।

नागपत्न्यः श्रीकृष्णस्य प्रसादनार्थं विनम्रतापूर्वकं तत्स्तुतिं चक्रु रिति भावः।

पद्यमिदं भुजङ्गप्रयातच्छन्दसा निबद्धम्। एतल्लक्षणं यथा–

''भुजङ्गप्रयातं भवेद्यैश्चतुर्भि '' रिति।
अपि चास्मिन्पद्येऽनुप्रासालंकारस्यालंकरणम्।।

**भाषार्थः**– कालियनाग की पत्नियों ने श्रीकृष्ण की स्तुति करते हुए कहा कि, हे जगदीश्वर! आप को हम प्रणाम करते हैं। हे चन्द्रमुख आप के सेवक इस कालिय पर आप प्रसन्न होवें। हम भी आप की दासियां बन कर आप के चरणकमलों में प्रणाम करते हैं।

**इति तासां वचः श्रुत्वा प्रसन्नोऽभूज्जगत्पतिः।**
**गच्छाशु स्वालयं नाग न भयं ते भविष्यति ।। 41।।**

**अन्वयः**– इति तासां वचः श्रुत्वा जगत्पतिः प्रसन्नोऽभूत्। (तस्मै चावदत् यत्) (हे) नाग ! स्वालयम् आशु गच्छ। ते भयं न भविष्यति।

**संस्कृतव्याख्या**– इति एवं प्रकारं, तासां नागपत्नीनां, वचः स्तुतिपरकां वाणीं, श्रुत्वा आकर्ण्य, जगत्पतिः जगतः संसारस्य पतिः ईश्वरः जगत्स्वामी इत्यर्थः। प्रसन्नोऽभूत् प्रहृष्टोऽभवत्। (तस्मै कालियनागाय चावदत् यत्) हे

नाग सर्पराज !, स्वालयं स्वकीयं वासस्थानम्, आशु यथाशीघ्रं, गच्छ याहि। ते भवतः, भयं भीतिः, न नहि, भविष्यति।

नागपत्नीनां स्तोत्रेण प्रमुदितः श्रीकृष्णः नागपत्नीः कालियनागं च अभयमददात् इति भावः।

तदिदं पद्यमनुष्टुप्च्छन्दसा निबद्धम्।

**भाषार्थः**- नागपत्नियों के स्तुति परक वचन सुन कर जगदीश्वर श्रीकृष्ण प्रसन्न हो गये, साथ ही उन्होंने कहा कि हे नागराज तुम जल्द से जल्द अपने निवास स्थान की ओर प्रस्थान करो, मैं तुम्हे अभय प्रदान करता हूँ।

**आज्ञप्तो हरिणा नागो हर्षितः स्वाश्रमं ययौ ।**
**ततः प्रभृति यमुना निर्विषोदकतां गता ।। 42।।**

**अन्वयः**- हरिणा आज्ञप्तो नागः हर्षितः (सन्) स्वाश्रमं ययौ। ततः प्रभृति यमुना निर्विषोदकतां गता।

**संस्कृतव्याख्या**- हरिणा श्रीकृष्णेन, आज्ञप्तः आदिष्टः, नागः कालियसर्पः, स्वाश्रमं स्वस्य आश्रमं निवासस्थानं, हर्षितः प्रहृष्टः आनन्दितो वा (सन्) ययौ जगाम, ततः प्रभृति तस्मात्कालादारभ्य, यमुना कालिन्दी, ''कालिन्दी सूर्यतनया यमुना शमनस्वसा'' इत्यमरः।

निर्विषोदकतां विषस्याभावः यस्मिन् तन् निर्विषं हालाहालरहितम् उदकं जलं तस्य भावः निर्विषोदकता तां, गता अधिगता।

श्रीकृष्णस्यादेशानुसारं प्रहृष्टमना कालियः स्वगृहं पातालपुरस्थं जगाम। येन यमुनायाः नद्याः जलं निर्विषं जातमिति भावः।

**भाषार्थः**- भगवान् श्रीकृष्ण से आदेश प्राप्त कर कालिय नाग अत्यन्त खुश हो कर अपने निवास स्थान चला गया। तब से यमुना नदी जहर हीन हो गई।

**एकदा भगवान् कृष्णः सबालोऽद्रिदिदृक्षया।**
**चचालाध्वानमाक्रम्य मध्येऽतिष्ठदघासुरः ।। 43 ।।**

**अन्वयः**- एकदा सबालः भगवान् कृष्णः अद्रिदिदृक्षया चचाल। अघासुरः मध्ये अध्वानम् आक्रम्य अतिष्ठत्।

**संस्कृतव्याख्या**- एकदा एकस्मिन् दिने, सबालः बालैः माणवकैः सह वर्त्तमानः, भगवान् परमेश्वरः कृष्णः वासुदेवः, अद्रिदिदृक्षया अद्रेः पर्वतस्य दिदृक्षया द्रष्टुम् इच्छया, चचाल जगाम। (''चल्'' धातोः लिटि प्रथमपुरुषे ''चचाल'' इति रूपं सिद्ध्यति)। अघासुर एतन्नामधेयः दैत्यः, मध्ये गमनावसरे, अध्वानं मार्गम्, आक्रम्य अवरुद्ध्य, अतिष्ठत् अवर्त्तत।

कस्मिंश्चिद्दिने भगवान् श्रीकृष्णः गोपबालकैः सह मिलित्वा पर्वतस्य दर्शनार्थं चचाल, तत्र मार्गे एव अघासुरनामधेयः कश्चन राक्षसः तन्मार्गं रुरोधेति भावः।

**भाषार्थः**- किसी एक दिन भगवान् श्रीकृष्ण ने गोपाल बालकों के साथ मिलकर पर्वत की शोभा देखने हेतु यात्रा प्रारम्भ की। बीच में ही अघासुर उन के मार्ग रोक कर खड़ा हो गया।

**तं दृष्ट्वाऽद्रिं प्रकल्प्याशु जग्मुर्बालाश्च तन्मुखे।**

**विचार्य भगवान् कृष्णो ययौ पश्चाद्धसन् मुखे ।। 44 ।।**

**अन्वयः**- तं दृष्ट्वा अद्रिं प्रकल्प्य बालाश्च तन्मुखे आशु जग्मुः। (परन्तु) भगवान् कृष्णः विचार्य पश्चात् हसन् मुखे ययौ।

**संस्कृतव्याख्या**- तम् अघासुरं, दृष्ट्वा अवलोक्य, अद्रिं पर्वतं, प्रकल्प्य मत्वा, बालाश्च गोपदारकाः, तन्मुखे तस्य दैत्यस्य मुखे वदनस्यान्तः, आशु तत्कालमेव, जग्मुः प्रवेशं चक्रुः। (परन्तु) भगवान् ईश्वरः, कृष्णः वासुदेवः, विचार्य विचिन्त्य, पश्चात् कालान्तरे, हसन् स्मितहासपूर्वकं, मुखे वदनोदरे, ययौ प्रविवेश।

मार्गेऽघासुरं दृष्ट्वा गोपबालकाः तं पर्वत इति मत्वा तन्मुखे त्वरितमेव ययुः, परन्तु श्रीकृष्णः मनसि किञ्चित् चिन्तयन्नेव कालान्तरे तन्मुखे प्रविवेशेति भावः।

**भाषार्थः**- मार्ग में अवस्थित उस अघासुर को देख कर गोप बालकों ने पहाड़ समझ कर उस के मुख के अन्दर बिना बिलम्ब किये प्रवेश किया। परन्तु भगवान् श्रीकृष्ण ने सोच विचार कर मुस्कराते हुये बाद में उस के मुख के अंदर प्रवेश किया।

**ववृधेऽन्तर्गले तेन रुद्धश्वासोऽसुरो मृतः ।**
**दृष्ट्या पीयूषवर्षिण्या जीवयन् बालकान् पुनः।।**

**निःससार स बालोऽसौ भित्त्वा तद्देहमाययौ ।**
**व्रजवेणुनिनादेन गोपीनां हर्षमावहन्।। 45-46।।**

**अन्वयः**- तेन अन्तः गले ववृधे। रुद्धश्वासः असुरः मृतः। पीयूषवर्षिण्या दृष्ट्या बालकान् पुनः जीवयन् स असौ बालः तद्देहं भित्त्वा निःससार। ब्रजवेणुनिनादेन गोपीनां हर्षम् आवहन् आययौ । इति।

**संस्कृतव्याख्या**- तेन श्रीकृष्णेन, अन्तः शरीरस्यान्त एव, गले ग्रीवायाः विवरे कण्ठस्यान्तः वा, ववृधे अवर्धत। (परिणामतः) रुद्धश्वासः रुद्धः अवरुद्धः श्वासः प्राणवायुः यस्य सः, (एवं भूतः) असुरः दैत्यः, मृतः निष्प्राणः संजातः। पीयूषवर्षिण्या अमृतप्रवाहिण्या, दृष्ट्या नेत्रपातेन, बालकान् गोपालदारकान्, पुनः जीवयन् प्राणसञ्चारं कारयन्, सोऽसौ सोऽयं, बालः बालकृष्णः, तद्देहं तस्य अघासुरस्य देहं शरीरं, भित्त्वा स्फारयित्वा, निःससार निर्जगाम। व्रजवेणुनिनादेन वंशीस्वनेन, गोपीनां ब्रजाङ्गनानां, हर्षं मोदम् आवहन् आदधन्, आययौ आजगाम। 'आ' उपसर्गपूर्वकात् 'या' धातोः लिट्लकारे प्रथमपुरुषस्य एकवचने आययौ इति रूपं सिद्ध्यति।

अघासुरस्य गल एव अन्तः श्रीकृष्णः स्वशरीरं वर्धयामास। परिणामतः दैत्यस्य श्वासावरोधपूर्वकं मृत्युः संजातः। तदनन्तरं दृष्टिपातेनैव गोपबालकान् पुनर्जीवयन् स्वयं श्रीकृष्णः तच्छरीरं स्फारयित्वा बहिराजगामेति भावः।

**भाषार्थः**– भगवान् श्रीकृष्ण ने अघासुर के अन्दर गले में स्वयं के शरीर को विशाल बना दिया। जिससे सांस रुक जाने के कारण दैत्य की मृत्यु हो गई। बाद में श्रीकृष्ण अपनी नजर से ही गोप के बच्चों को जीविति कर स्वयं उस के शरीर को फाड़ कर बाहर आ गये।

**पुष्पवृष्टिरभूद्व्योम्नो गन्धर्वा ललितं जगुः।**
**अवादयंस्तथा देवा वादित्राणि च हर्षिताः ।। 47 ।।**

**अन्वयः**– व्योम्नः पुष्पवृष्टिः अभूत्। गन्धर्वाः ललितं जगुः। तथा च हर्षिताः देवाः वादित्राणि अवादयन्।

**संस्कृतव्याख्या**– व्योम्नः नभसः, पुष्पवृष्टिः कुसुमवर्षणम्, अभूत् अभवत् । गन्धर्वाः देवयोनिविशेषाः किन्नराः ललितं समधुरं, जगुः गीतगानं चक्रुः। तथा च अपि च देवा अमराः "अमरा निर्जरा देवाः " इत्याद्यमरः। हर्षिताः मुदिताः (सन्तः),वादित्राणि वाद्ययन्त्राणि, अवादयन् अनादयन् ।

अघासुरस्य व्यापादनात्प्रमुदितै आकाशचारिभिः पुष्पवृष्टिः कृता, गन्धर्वैः सुमधुरं गीतं गीतम्, देवैश्च वादित्रजातं वादितमिति भावः।

**भाषार्थः**– अघासुर के मृत्यु के कारण आकाश से फूल की वर्षा हुई, गन्धर्वों ने प्रसन्नतापूर्वक सुललित गीत गाना प्रारम्भ कर दिया, और प्रहृष्ट देवताओं ने वाद्यविशेषों का वादन किया ।

**मुञ्जाटव्यां वृषादित्ये सबालश्चारयन् स गाः।**
**प्राप्तो दावानलस्तत्र प्रादुरासीच्च्वलन् दिशः ।। 48 ।।**

**अन्वयः**– सबालः सः वृषादित्ये गाः चारयन् मुञ्जाटव्यां प्राप्तः। तत्र दिशः च्वलन् दावानलः प्रादुरासीत्।

**संस्कृतव्याख्या**– सबालः बालैः गोपालबालकैः सह मिलितः, सः श्रीकृष्णः, वृषराशिगते आदित्ये अर्थात् ग्रीष्मर्तौ गाः धेनूः, चारयन् तृणानि खादयन्, मुञ्जाटव्यां मुञ्जनामधेयायाम् अटव्यां नाम अरण्ये, प्राप्तः

उपस्थितोऽभूत्। तत्र अरण्ये, दिशः आशाः ककुभान् वा, ज्वलन् दहन् दावानलः दावाग्निः, प्रादुरासीत् प्रादुर्बभूव।

एकदा ग्रीष्मर्तौ (ज्येष्ठमासे) श्रीकृष्णः गोपालबालकैः सह मिलित्वा गोचारणपूर्वकं मुञ्जारण्ये प्राप्तवान्, तदानीं दावानलः सर्वतः च्वलन्नेव तत्र प्रादुरभूदिति भावः।

**भाषार्थः**- एकदिन ग्रीष्म ऋतु में श्रीकृष्ण अपने मित्रों गोपाल बालकों के साथ गाय चराते हुए मुञ्ज नामक जंगल में जा पहुंचे। उस समय वहां सभी ओर से जलती हुई दावाग्नि प्रकट हुई।

**सभयाः बालकाः सर्वे क्रन्दन्त्यो धेनवोऽभवन्।**
**पाहि पाहि हरे कृष्ण त्वदीयान् ग्रसतेऽनलः ।।49।।**

**अन्वयः**- सर्वे बालकाः सभयाः धेनवः (च) क्रन्दन्त्य अभवन्। (हे) हरे ! कृष्ण! पाहि पाहि, त्वदीयान् अनलः ग्रसते।

**संस्कृतव्याख्या**- सर्वतः प्रच्वलिताग्निं दृष्ट्वा सर्वे समस्ताः, बालकाः गोपदारकाः, सभयाः भयभीताः, धेनवः गावश्च, क्रन्दन्त्य रुदन्त्यः चीत्कुर्वत्यो वा, अभवन् संजाताः। (हे) हरे ! कृष्ण! वासुदेव ! पाहि पाहि रक्ष रक्ष। त्वदीयान् तावकान् स्वकीयान्, अनलः वह्निः, ग्रसते दहति, इति।

अरण्ये अग्नेः प्रभावं दृष्ट्वा गोपबालकाः गावश्च भयभीताः त्राणार्थं श्रीकृष्णं प्रार्थयाञ्चक्रुरिति भावः।

**भाषार्थः**- सभी ओर से जलती हुई अग्नि को देख कर भयत्रस्त सभी बच्चे और गाय चिल्लाने लग गये कि, हे कृष्ण आप के स्वजनों को यह अग्नि भक्षण करने वाली है, अतः हम सभी को बचा लीजिये।

**भयं व्रजत मा बाला निमील्याक्षीणि तिष्ठत।**
**पपौ स भगवान् दावं तद्भयं दूरतो गतम् ।।५०।।**

**अन्वयः**- (हे) बाला! भयं मा व्रजत। अक्षीणि निमील्य तिष्ठत। स भगवान् दावं पपौ। तद्भयं दूरतः गतम्।

**संस्कृतव्याख्या**- (हे) बाला (हे) माणवका! ''बालस्तु स्यान्माणवकः'' इत्यमरः। भयं भीतिं मा नहि, व्रजत गच्छत। अक्षीणि नेत्रे, निमील्य पिधाय, तिष्ठत वर्त्तध्वम्। (तदनन्तरं) स भगवान् श्रीकृष्णः, दावं दावानलं, पपौ पीतवान् । (परिणामतः) तद्भयं तस्य दावानलस्य भयं भीतिः, दूरतः गतम् अपगतम्।

श्रीकृष्णः गोपमाणवकान् अभयं दत्त्वा स्वयं दावानलं पपौ। येन दावानलजनितं भयं दूरीभूतमिति भावः ।

**भाषार्थः**- श्रीकृष्ण ने गोप वासी बच्चों से कहा कि, हे बच्चो! डरो मत। तुम सब आंखे बन्द कर खड़े हो जाओ। उस के बाद उन्होंने दावानल को पी लिया। परिणाम स्वरूप दावानल के बुझ जाने से सभी बच्चे निडर हो गये।

**परावृत्त्य जलं पीत्वा नद्याः स्वगृहमाययौ।**
**प्रावृट् समाययौ पश्चात् सतडिद्घनवृष्टयः।। 51।।**

**अन्वयः**- परावृत्त्य नद्याः जलं पीत्वा स्वगृहम् आययौ । पश्चात् प्रावृट् समाययौ। (तदनन्तरं) सतडिद् घनवृष्टयः (बभूवुः)।

**संस्कृतव्याख्या**- परावृत्त्य तस्मात् मुञ्जारण्यात् प्रत्यागत्य, नद्याः सरितः, जलं नीरं, पीत्वा आचम्य, स्वगृहम् आत्मनः निवासस्थानम्, आययौ आजगाम । पश्चात् कालान्तरे, प्रावृट् वर्षाः ''स्त्रियां प्रावृट् स्त्रियां भूम्नि वर्षाः'' इत्यमरः। समाययौ समागता। (तदनन्तरं) सतडिद्घनवृष्टयः तडिद्भिः विद्युद्भिः सह घनवृष्टयः निबिडवर्षणनि, बभूवु : अभवन्।

वासुदेवः श्रीकृष्णः मुञ्जारण्यात् प्रत्यागत्य नद्याः जलं पीत्वा गोपपुरम् आजगाम। तदनन्तरं वर्षाकाले समागते सविद्युद्भयङ्करवृष्टिर्बभूवेति भावः।

**भाषार्थः**- भगवान् श्रीकृष्ण मुञ्जारण्य से लौट कर नदी का जल पीकर अपने निवास स्थान पर आ गये। उस के बाद तेज बारिश आ जाने पर बिजली के साथ तेज पानी गिरने लगा।

**बभुवुर्मुदिताः सर्वे गोपाः कृषिपरायणाः ।**
**अन्नवृद्धिरभूत् पश्चाद् धनसम्पत्समृद्धयः ।। 52 ।।**

**अन्वयः**– कृषिपरायणाः सर्वे गोपाः मुदिताः बभूवुः, (यतो हि) अन्नवृद्धिः अभूत्। पश्चात् धनसम्पत्समृद्धयः (अभवन्)।

**संस्कृतव्याख्या**– कृषिपरायणाः कृषिकार्यनिरताः सर्वे समस्ताः,गोपाः ब्रजवासिनः,मुदिताः प्रहृष्टाः, बभूवु : अभवन्। (यतो हि) अन्नवृद्धिः अन्नानां शस्यानां वृद्धिः पोषणम् अभूत् अभवत्। पश्चात् कालान्तरे, धनसम्पत्समृद्धयः धनधान्यप्रवृद्धयः, (अभवन्)

सम्यग्वृष्टिकारणात् कृषिबलाः सर्वेऽपि गोपाः प्रसन्नचित्ताः बभूवुः। यतो हि अन्नसमृद्ध्या धनधान्यानां वृद्धिरभवदिति भावः।

**भाषार्थः**– अच्छी बरसात के कारण कृषि कर्म पर निर्भर सभी गोपवासी प्रसन्न हो गये, क्यों कि खेती अच्छी होने लगी। परिणाम स्वरूप धनसम्पत्तियों मे वृद्धि हुई।

**शक्रपूजोत्सवं कर्त्तुं नन्दादीनामभून्मनः।**
**वारयामास भगवान् किमस्माकं सुरेशतः ।।**

**गिरिर्गोवर्द्धनो नाम देव इष्टप्रदोऽस्ति नः।**
**कृष्णेनोक्तं वचः श्रुत्वा तत्पूजायां मनो ददुः ।। 53-54 ।।**

**अन्वयः**– शक्रपूजोत्सवं कर्त्तुं नन्दादीनां मनः अभूत् । भगवान् वारयामास (यत्) अस्माकं सुरेशतः किम् ? गिरिगोवर्द्धनो नाम देवः न इष्टप्रदः अस्ति। कृष्णेनोक्तं वचः श्रुत्वा (नन्दादयः) तत्पूजायां मनः ददुः।

**संस्कृतव्याख्या**– शक्रपूजोत्सवं शक्रस्य देवराजस्येन्द्रस्य पूजोत्सवं पूजा च उत्सवश्चेति पूजोत्सवः अर्चनासमारोहः तं कर्त्तुं सम्पादयितुं, नन्दादीनां गोपाधिपतिप्रभृतीनां, मनः चेतः ''चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः'' इत्यमरः। अभूत् संजातम्। भगवान् ईश्वरः श्रीकृष्णः (तान्) वारयामास निवारितवान्, (यत्) अस्माकं नः, सुरेशतः देवेन्द्रात्, किं प्रयोजनम्?

नास्त्यस्माकं किमपि प्रयोजनं तेनेत्यर्थः । गिरिगोवर्द्धनः, नाम नामधेयः, देवः दिव्यात्मा, न अस्माकम्, इष्टदेवः अभीष्टप्रभुः, अस्ति विद्यते । कृष्णेन वासुदेवेन, उक्तं कथितं, वचः वचनं, श्रुत्वा आकर्ण्य, (नन्दादयः) तत्पूजायां तस्य गोवर्द्धनस्य पूजायाम् अर्चनायां, मनः चित्तं, ददुः दत्तवन्तः ।

शक्रपूजानिमित्तमुद्यताः नन्दपुरस्सराः गोपाः श्रीकृष्णेन निवारिताः यत्तत्पूजयाऽलम्, यतोह्यस्माकं वन्दनीयस्तु गोवर्धनपर्वत एव। तत्परामर्शं स्वीकुर्वद्भिस्तैर्गोपैः गोवर्धनस्य पूजनार्थं मन अकारीति भावः।

**भाषार्थः**- एकबार नन्दबाबा आदि ने देवराज इन्द्र की पूजा बड़े समारोह पूर्वक करने हेतु मानस बनाया। परन्तु श्रीकृष्ण ने विरोध पूर्वक कहा कि, हमें देवेन्द्र से कोई मतलब नहीं है, हमारे इष्ट देव तो गोवर्द्धन पर्वत है। श्रीकृष्ण की बात सुनकर नन्द आदि ने गोवर्धन की पूजा करने हेतु मानस बना लिया।

**घृतक्षीरगुडादीनामन्नादीनां विशेषतः ।**
**संभारान् चक्रुरमितान् गोपा हर्षसमन्विताः ।। 55 ।।**

**अन्वयः**- हर्षसमन्विताः गोपाः अन्नादीनां विशेषतः घृतक्षीरगुडादीनाम् अमितान् संभारान् चक्रुः।

**संस्कृतव्याख्या**- हर्षसमन्विताः हर्षेण आनन्दातिरेकेण समन्विताः संयुताः, गोपाः ब्रजवासिनः, अन्नादीनाम् ओदनादीनां, विशेषतः विशेषरूपेण, घृतक्षीरगुडादीनां हविर्दुग्धशर्कराखण्डादीनाम्, अमितान् प्रचुरान्, संभारान् समुच्चयान्, चक्रुः विदधधुः।

प्रमुदिताःगोपाः गोवर्धनस्य पूजोत्सवे तस्मै पर्वतवराय विविधान् सुमिष्टान् भोच्यान् समर्पयामासुरिति भावः।

**भाषार्थः**- अत्यधिक आनन्दित गोपवासियों ने गोवर्धन के सत्कार में घृतक्षीर तथा गुड़ मिष्टान्न अन्नों की ढेर तैयार कर सौंपी।

**धेनुवत्सानलंकृत्य पूजयामासुरादरात्।**
**भुक्तमन्नं भगवता रुचितो नगरूपिणा ।। 56 ।।**

**अन्वयः**- (गोपाः) धेनुवत्सान् अलंकृत्य आदरात् पूजयामासुः। नगरूपिणा भगवता रुचितः अन्नं भुक्तम्।

**संस्कृतव्याख्या**- (गोपाः) धेनुवत्सान् धेनुः गाश्च वत्सान् तत्सन्ततीश्च, अलङ्कृत्य गन्धपुष्पादिभिः विभूषयित्वा, आदरात् ससम्मानं पूजयामासु अर्चयामासुः। नगरूपिणा पर्वतस्वरूपकेण गोवर्धनेन, रुचितः रुच्याः स्वमनोनुकूलम्, अन्नं भोच्यं, भुक्तम् खादितम्।

प्रमुदिताः गोपाः पुष्पचन्दनादिभिः गोवत्सादीन् अलंकृत्य सादरं पूजितवन्तः, पर्वतराजेन गोधर्धनेन स्वरुचितमन्नं स्वीकृतमिति भावः।

**भाषार्थः**- गोपवासियों ने गन्धपुष्प आदि से गाय एवं बछडों की पूजा बड़े आदर के साथ की। पर्वत के रूप धारण करने वाले भगवान् गोवर्धन ने अपनी रुचिके अनुसार अन्न का सेवन किया।

**ननृतुबार्लका गावो जयध्वनिरभूत्ततः ।**
**तच्छ्रुत्वा क्रोधमापन्नो शक्रः पूजाव्यतिक्रमे ।। 57 ।।**

**अन्वयः**- बालकाः गावः (च) ननृतुः। ततः जयध्वनिः अभूत्। पूजाव्यतिक्रमे तत् श्रुत्वा शक्रः क्रोधमापन्नः।

**संस्कृतव्याख्या**- बालकाः गोपदारकाः गावः धेनवश्च, ननृतुः नृत्यं चक्रुः। ततः तदनन्तरं जयध्वनिः जयजयकार इति माङ्गलिकशब्दः,अभूत् अभवत्। पूजाव्यतिक्रमे आत्मनः पूजाया अर्चनायाः व्यतिक्रमे व्यवधाने, तच्छ्रुत्वा तदाकर्ण्य, शक्रः देवराज इन्द्रः, क्रोधं कोपम्, आपन्नः संप्राप्तः।

व्रजपुरवास्तव्याः बालकाः धेनवश्च सानन्दं नृत्यं चक्रुः, परन्तु सुराधिपति इन्द्रस्तत्पूजाया व्यतिक्रमं दृष्ट्वा चुक्रोधेति भावः।

**भाषार्थः**- गोपबालकों तथा गायों ने खुशी के मारे नृत्य किया, उस के साथ ही जय ध्वनि गूंजने लगी। देवराज इन्द्र यह सब सुन कर स्वयं की पूजा में व्यतिक्रम के कारण क्रुद्ध हो गये।

**संवर्त्तादीन् घनान् तत्र प्रेरयामास दारुणान् ।**
**ववर्षुरुद्धताः सर्वे धारासंपातवृष्टिभिः ।। 58।।**

**अन्वयः**- (स इन्द्रः) दारुणान् संवर्तादीन् घनान् तत्र प्रेरयामास। उद्धताः सर्वे धारासंपातवृष्टिभिः ववर्षुः।

**संस्कृतव्याख्या**- स क्रुधितः सुराधिपतिः दारुणान् प्रचण्डान्, संवर्तादीन् प्रलयादीन्, ''संवर्तः प्रलयः कल्पः क्षयः कल्पान्त इत्यपि'' इत्यमरः। घनान् मेघान्, तत्र गोपपुरे, प्रेरयामास प्रेषयामास, उद्धताः उद्दण्डाः, सर्वे सकलाः मेघास्ते, धारासंपातवृष्टिभिः धारासंपातानाम् आसाराणां वृष्टिभिः वर्षणैः, ''धारासंपात आसारः'' इत्यमरः। ववर्षुः अवर्षन्।

कुपितः सुरपतिः भयङ्करान् संवर्तादीन् मेघान् गोपपुरे प्रेषयामास। ते मेघा अपि प्रचण्डधाराभिः वर्षणं चक्रुरिति भावः।

**भाषार्थः**- अपनी पूजा के व्यतिक्रम से नाराज देवराज इन्द्र ने संवर्त आदि प्रचण्ड बादलों को गोप पुर के लिये भेजा। वे बादल भी लगातार पानी बरसने लगे।

**दधौ गोवर्धनं वामकराङ्गुलिकनिष्ठया।**
**नाचलत् पदमेकं तु प्रसन्नो दिनसप्तकम् ।। 59।।**

**अन्वयः**- (वासुदेवः) वामकराङ्गुलिकनिष्ठया गोवर्धनं दधौ। प्रसन्नः (सः) दिनसप्तकं तु पदमेकं नाचलत्।

**संस्कृतव्याख्या**- (वासुदेवः) वामकराङ्गुलिकनिष्ठया सव्येत-रहस्तस्य कनिष्ठिकया अङ्गुल्या, गोवर्धनम् इत्याख्यं पर्वतं, दधौ धारयामास। प्रसन्नः प्रमुदितः (सः) दिनसप्तकं सप्तसंख्यकानि दिनानि, तु पदमेकम् एकमपि चरणन्यासं, नाचलत् नागच्छत्।

प्रबलमेघवर्षणात्सर्वान् गोपान् त्रातुमेव वासुदेवः स्ववामकरस्य कनिष्ठाङ्गुल्या गोवर्धनं दधार। अपि च सः सप्तदिनानि यावत्पदमेकमपि तत्स्थानान्नैव चचालेति भावः।

**भाषार्थः**- तेज बरसात से परेशान गोपवासियों के रक्षार्थ श्रीकृष्ण ने सात दिनों तक एक ही स्थान पर खड़े हो कर अपने बायें हाथ की कनिष्ठिका अंगुलि से गोवर्धन पर्वत को धारण किया।

**वृष्टिः शान्ताभवत्पश्चात् प्रसेदुश्च दशो दिशः।**
**गोधनानि पुरस्कृत्य गोप्यो गोपाश्च निस्सृताः।।**

**गायन्त्यः कृष्णचरितं हर्षनिर्भरमानसाः।**
**गोवर्द्धनगिरिं देवः स्थापयामास पूर्ववत् ।। 60-61।।**

**अन्वयः**- पश्चात् वृष्टिः शान्ता अभवत् । दश दिशश्च प्रसेदुः। गोप्यः गोपाश्च हषनिर्भरमानसाः कृष्णचरितं गायन्त्यः सत्यः गोधनानि पुरस्कृत्य निःसृताः। देवः गोवर्द्धनगिरिं पूर्ववत् स्थापयामास।

**संस्कृतव्याख्या**- पश्चात् कालान्तरे, वृष्टिः मेघवर्षणं, शान्ता प्रशमिता, अभवत् संजाता। दश दशसंख्यकाः, दिशश्च आशाश्च, प्रसेदुः नैर्मल्यमापुः। गोप्यः गोपाङ्गनाः, गोपाश्च गोपालकाश्च, हर्षनिर्भरमानसाः प्रसन्नचित्ताः, कृष्णचरितं कृष्णगुणगानं, गायन्त्यः गानं कुर्वत्यः (गोप्यः) गोधनानि गावः धेनव एव धनानि सम्पत्तयः तानि, पुरस्कृत्य अग्रतो कृत्वा, निस्सृताः बहिः निर्गताः। देवः वासुदेवः, गोवर्द्धनगिरिं पर्वतं, पूर्ववत् यथापूर्वं तथा परम्, स्थापयामास अस्थापयत।

श्रीकृष्णस्य प्रभावादेव कालान्तरे प्रशमितासु वर्षासु सकलगोप-वास्तव्याः गोधनैः सह सानन्दं निर्जग्मुः। श्रीकृष्णश्च तं गिरिं पूर्ववत् नीचैः स्थापितवान्निति भावः।

**भाषार्थः**- बरसात के बन्द हो जाने के पश्चात् सभी दिशाएं शान्त हो गई। फलस्वरूप सभी गोप गोपियों ने गोधन के साथ बाहर निकलना

प्रारम्भ किया। श्रीकृष्ण ने भी गोवर्धन को यथा स्थान स्थापित किया।

**सिषेच शक्र आगत्य सुरभ्या साकमम्बरात्।**
**दण्डवत्पतितो भूमौ कृताञ्जलिपुटो हरिम् ।।62।।**

**अन्वयः**- शक्रः सुरभ्या साकम् अम्बरात् आगत्य सिषेच। कृताञ्जलिपुटः असौ दण्डवत्पतितः हरिम् (अस्तुवत्)।

**संस्कृतव्याख्या**- शक्र इन्द्रः, सुरभ्या कामधेन्वा, साकं सह, अम्बरात् नभसः, आगत्य अवतीर्य, (गोवर्धनं) सिषेच सेचनं चकार अभिसिञ्चितवान् वा । (अपि चासौ) कृताञ्जलिपुटः बद्धाञ्चलिः भूत्वा, भूमौ धरित्र्यां, दण्डवत्पतितः दण्डाकारेण प्रणिपातपूर्वकं, हरिं श्रीकृष्णम्, अस्तुवत् स्तुतिं चकार।

शक्रः स्वर्लोकादवतीर्य गोवर्धनगिरिमभिसिञ्चितवान् अपि च बद्धाञ्जलिपूर्वकं दण्डवद्भूमौ प्रणिपत्य श्रीकृष्णाय न्यवेदयदिति भावः।

**भाषार्थः**- देवराज इन्द्र ने कामधेनु के साथ स्वर्ग से अवतरण कर गोवर्धन गिरि का अभिषेक किया और हाथ जोड़कर भूमि पर दण्डवत् प्रणाम करते हुए श्रीकृष्ण की स्तुति की।

**कमलालय कमलास्यं कमलाभं* कमलनाभमहम्।**
**गिरिगोवर्द्धननाथं वन्दे कृष्णं गवां नाथम् ।।63।।**

**अन्वयः**- (हे) कमलालय! अहं कमलास्यं कमलाभं कमलनाभं गिरिगोवर्द्धननाथं गवां नाथं कृष्णं वन्दे।

**संस्कृतव्याख्या**- हे कमलालय! कमलं सरसिजमेव आलयः गृहं यस्य सः तत्सम्बोधने, अहम् इन्द्रः, कमलास्यं कमलं वारिजमिव आस्यमाननं यस्य सः कमलास्यः तं, कमलाभं कमलस्य आभा कान्तिरिव आभा यस्य तं, कमलनाभं कमलमेव नाभौ यस्य सः कमलनाभः तं, गिरिगोवर्द्धननाथं गिरिगोवर्द्धनस्य पर्वतराजस्य नाथं प्रभुमीशं वा, गवां धेनूनां नाथम् ईशं, कृष्णं वासुदेवं, (त्वां) वन्दे प्रणमामि।

पद्येऽस्मिन् आर्याच्छन्दसः संविधानम्। अपि चात्र अनुप्रासोऽलंकारः।

*''कमलाय'' इति मूलपाठो विद्यते, परन्तु ''कमलाभं'' इति पाठः साधीयान्।

देवराज इन्द्रः श्रीकृष्णं स्तुवन् ब्रूते यत्, हे कमलनाभ! त्वामहं प्रणमामीति भावः।

**भाषार्थः**– श्रीकृष्ण की स्तुति करते हुए देवराज इन्द्र ने कहा कि, हे कमलनिवास! मैं इन्द्र कमलानन, कमल के तुल्य कान्ति वाले, कमलनाभ, गिरि गोवर्धन के स्वामी गोकुल के मालिक आप को प्रणाम करता हूँ।

**कमलकरैः कमलाङ्घ्रेरमरवराः कृतरजःस्पर्शाः ।**
**अपहृततमोरजस्काः तस्करणं रजोऽनिशं वन्दे ।।64।।**

**अन्वयः**– कृतरजःस्पर्शाः अपहृततमोरजस्काः अमरवराः कमलकरैः कमलाङ्घ्रेः (यद्) रजः तस्करणं (कुर्वन्ति) (तदहम्) अनिशं वन्दे।

**संस्कृतव्याख्या**– कृतः विहितः रजसां धूलीनां स्पर्शः संसर्गः यैः ते कृतरजःस्पर्शाः, अपहृततमोरजस्काः अपहृतः व्यपगतः तमोगुणः रजोगुणश्च येषां ते, अमरवराः देवगणप्रमुखाः, कमलकरैः कमलानीव वारिजानीव सुकोमलाः ये कराः तैः,कमलाङ्घ्रेः कमलमिव सुकोमल अङ्घ्रिः चरणं यस्य तस्य, (यद्) रजःतस्करणं धूलिमोषणं, (कुर्वन्ति) तदहम् इन्द्रः अनिशम् अनारतं वन्दे प्रणमामि।

अत्राप्यार्याच्छन्दः। अलङ्कारोऽप्यत्रानुप्रासः।

देवराज इन्द्रः स्तुतिं कुर्वन् ब्रूते यदहमिन्द्रः त्वदीयं त्वच्चरणरजः प्रणमामि, यत्खलु देवगणप्रमुखैः स्वकरकमलैरपह्रियते इति भावः।

**भाषार्थः**– जिनके चरण धूल प्राप्त कर देवगण तमोगुण तथा रजोगुण को पार किये हुए हैं, उन के चरण कमल के उस पवित्र धूल को मैं इन्द्र हमेशा प्रणाम करता हूँ।

**अनयं मां कुरु सनयं ज्ञात्वा स्वीयं त्रिलोकनाथ त्वम्।**
**परिपाल्योऽहं भवता भवतु न भेदेऽस्ति बुद्धिरियम् ।। 65।।**

**अन्वयः**- (हे) त्रिलोकनाथ! त्वं स्वीयं ज्ञात्वा अनयं मां सनयं कुरु। अहं भवता परिपाल्यः। भवतु इयं बुद्धिः भेदे न अस्ति।

**संस्कृतव्याख्या**- (हे) त्रिलोकनाथ! त्रयाणां लोकानां स्वर्गमर्त्य-पातालाख्यानां नाथः स्वामी यः तत्सम्बोधने, त्वं भवान्, स्वीयम् आत्मीयं, ज्ञात्वा बुद्ध्वा, अनयं दुर्विनीतं, मां सुरपतिं, सनयं विनीतं नीतिवन्तं वा, कुरु विधेहि, अहं सुरेन्द्रः, भवता त्वया, परिपाल्यः रक्षणीयः, भवतु अस्तु तावत्। इयम् एषा, बुद्धिः मतिः, भेदे स्वेतरे नास्ति न भवति।

पद्येऽस्मिन् आर्याच्छन्दः।

हे त्रिलोकाधिपते ! दुर्विनीतं मामात्मीयं बुद्ध्वा विनीतं कुरु। तदत्र भवताऽहं सर्वथा परिरक्षणीयः। यतो हि न मे भेदबुद्धिरस्ति इति भावः।

**भाषार्थः**- स्तुति करते हुए देवराज इन्द्र ने कहा- है त्रिलोकेश्वर श्री कृष्ण! आप मुझे अपना ही समझ कर दुर्विनीत को विनीत बनाइये। क्योंकि मैं आप के द्वारा परिपालनीय हूँ और मैं आप से स्वयं को अलग नहीं समझता।

**त्वत्तो जगदिदमुत्थं भगवन् सागरोद्भवा यथा हि कल्लोलाः।**
**अहमपि त्वत्तो जातः क्षन्तव्यो मेऽपराधोऽसौ ।।66।।**

**अन्वयः** - हे भगवन्! यथा हि कल्लोलाः सागरोद्भवाः (तथैव) इदं जगत् त्वत्त उत्थम्। अहमपि त्वत्तः जातः। मे असौ अपराधः क्षन्तव्यः।

**संस्कृतव्याख्या**- हे भगवन्! हे ईश्वर! यथा हि यथैव, कल्लोलाः महातरङ्गाः, सागरोद्भवाः सागरात् समुद्रात् उद्भवाः उद्गताः, (तथैव) इदम् एतद्, जगत् संसारकं, त्वत्तः भवतः, उत्थम् निर्गतम्। अहमपि स्वयमप्यहं, त्क्तः भवतः, जातः उत्पन्नोऽस्मि। (अतः) मे मम, असौ अयम्, अपराधः दोषः, क्षन्तव्यः मर्शितव्यः ।

हे जगन्नाथ ! समुद्राद्विशालतरङ्गणामुत्पत्तिरिव त्वत्तः समग्रोऽयं संसारोऽजायत, अहमपि स्वयं भवतः उत्पन्नोऽस्मि। अतो भवान् मम दोषमिमं क्षमतामिति भावः।

**भाषार्थः**- देवराज इन्द्र ने श्रीकृष्ण की स्तुति करते हुए कहा कि, हे प्रभो! जिस प्रकार समुद्र से बड़े तरङ्गों की उत्पत्ति हुई है, उसी प्रकार यह सारा संसार आप से ही उत्पन्न हुआ है, मैं भी आप से उत्पन्न हुआ हूँ। मेरे द्वारा किये गये इस अपराध को क्षमा कर देवें।

**प्रज्ञा न च मे रसना त्वां स्तोतुं कथमहं प्रवृत्तः स्याम्।**
**प्रज्ञाहीनः पशुरिव रसनाहीनश्च मण्डूकः ।।67 ।।**

**अन्वयः**- मे प्रज्ञा न च (मे) रसना, प्रज्ञाहीनः पशुरिव, रसनाहीनः मण्डूक इव च अहं त्वां स्तोतुं कथं प्रवृत्तः स्याम् ।

**संस्कृतव्याख्या**- मे मम, प्रज्ञा बुद्धिः, न च न हि (मे) रसना जिह्वा, प्रज्ञाहीनः प्रज्ञया बुद्ध्या हीन रहितः, मूढ इत्यर्थः। पशुरिव मृग इव , रसनाहीनः जिह्वारहितः, मण्डूकः दर्दुरः, ''भेके मण्डूकवर्षाभूशालूरप्लवदर्दुराः'' इत्यमरः। इव यथा, त्वां भवन्तं वासुदेवं, स्तोतुं प्रार्थयितुं, च अहम् इन्द्रः, कथं केन प्रकारेण, प्रवृत्तः सम्पृक्तः, स्याम् भवेयम्। नाहं प्रवृत्तो भवेयमित्यर्थः।

पद्येऽस्मिन्नार्याच्छन्दः।

देवराज इन्द्रः स्वविनम्रतां प्रकटयन् ब्रूते यदहं निष्प्रज्ञः भवत्स्तुतिकरणे नितरामसमर्थ एवेति भावः।

**भाषार्थः**- न तो मेरी बुद्धि है और न मेरी जीभ ही है। क्योंकि मैं (इन्द्र) पशु की तरह बुद्धि हीन हूँ और मेंढक की तरह जीभ हीन हूँ। आप की स्तुति करने मे असमर्थ हूँ।

**त्वं मे माता त्वं पिता त्वं च बन्धुः**
**त्वं मे भ्राता त्वं सखा त्वं गुरुश्च।**

**त्वत्तो नान्यः कश्चिदस्तीह लोके**
**स्वीयं ज्ञात्वा पालनीयोऽस्मि नाथ ।।68।।**

**अन्वयः** - त्वं मे माता, त्वं (मे) पिता, त्वं च (मे) बन्धुः (असि)। त्वं मे भ्राता त्वं (मे) सखा, त्वं च (मे) गुरु : (असि)। इह लोके त्वत्तः नान्यः कश्चित् अस्ति। (हे) नाथ ! स्वीयं ज्ञात्वा (अहं) पालनीयोऽस्मि।

**संस्कृतव्याख्या**- देवराज इन्द्रः स्तुतिकरणप्रसङ्गे श्रीकृष्णाय निवेदयति यत्-त्वं च (मे) पिता जनकः, त्वं च (मे) बन्धुः प्रियजनः (असि)। त्वं (मे) भ्राता सहोदरः, त्वं (मे) सखा मित्रम्, त्वं च (मे) गुरु : उपदेष्टा असि। इह अस्मिन्, लोके संसारे, त्वत्तः भवत्तः, नान्यः नापरः, कश्चित् कोऽपि, अस्ति वर्त्तते। (हे) नाथ स्वामिन्।, स्वीयम् आत्मीयं, ज्ञात्वा अवबुद्ध्य, (अहं) पालनीयोऽस्मि रक्षणीयोऽस्मि।

पद्येऽस्मिन् शालिनीछन्दो विद्यते। एतल्लक्षणं यथा-

''मात्तौ गौ चेच्छालिनी वेदलोकैः'' (छ.म.)। अलङ्कारस्त्वत्रानुप्रासः।

त्वामतिरिच्य न मे कोऽप्यन्यः प्रिय इति भावः।

**भाषार्थः**- हे भगवन् श्रीकृष्ण! आप मेरी माँ हैं, आप मेरे पिता हैं, आप मेरी ज्ञाति जन हैं, आप मेरे भाई, दोस्त और गुरु हैं। इस संसार में आप को छोड़कर मेरा और कोई नहीं है। हे प्रभो! मुझे अपना समझकर अब मेरी रक्षा करें।

**इति संस्तूय मघवा भगवन्तमधोक्षजम्।**
**परिक्रम्य च संसिच्य गोविन्दं स्वर्ययौ च सः ।।69।।**

**अन्वयः**- सः मघवा इति संस्तूय अधोक्षजं भगवन्तं गोविन्दं परिक्रम्य संसिच्य च स्वः ययौ।

**संस्कृतव्याख्या**- सः पूर्वोक्तवर्णितः, मघवा इन्द्रः, ''इन्द्रो मरुत्वान्मघवा विडौजा पाकशासनः'' इत्यमरः। इति एवंप्रकारेण, संस्तूय

सम्प्रार्थ्य, अधोक्षजं पुरुषोत्तमं, ''देवकीनन्दन: शौरि: श्रीपति: पुरुषोत्तम: वनमाली: बलिध्वंसी कंसारातिरधोक्षज:'' इत्यमर:। भगवन्तं परमेश्वरं, गोविन्दं गरुडध्वजं वासुदेवं, ''दैत्यारि: पुण्डरीकाक्षो गोविन्दो गरुडध्वज:'' इत्यमर:। परिक्रम्य परिक्रमापुरस्सरमर्चयित्वा, संसिच्य अभिषिच्य च, स्व: स्वर्गं, ''स्वरव्ययं स्वर्गनाक-'' इत्यमर:। ययौ जगाम। ''या'' इति धातो: लिटि प्रथम-पुरुषैकवचने।

पद्येऽस्मिन्ननुष्टुप्छन्द:।

स्तुतेरनन्तरमेव सुरपति: भगवन्तं श्रीकृष्णं परिक्रम्य स्वर्गं प्रति अगादिति भाव:।

**भाषार्थ:**- उस देवराज इन्द्र ने इस प्रकार स्तुति करते हुए श्रीकृष्ण की परिक्रमा कर के तथा उन का अभिषेक कर स्वर्ग की ओर प्रस्थान किया।

**एकदा यमुनातीरे बुभुजेऽन्नं स बालक:।**
**कृष्ण: कमलपत्राक्षो वत्सा दूरतरं गता: ।।70।।**

**अन्वय:**-एकदा स: बालक: कमलपत्राक्ष: कृष्ण: यमुनातीरे अन्नं बुभुजे। वत्सा: दूरतरं गता:।।

**संस्कृतव्याख्या**- एकदा एकस्मिन् दिने, स: पूर्वोक्त:, बालक: शिशु: किशोरो वा, कमलपत्राक्ष: कमलपत्रे इव वारिजदले इव अक्षीणि नेत्रे यस्य स: कृष्ण: वासुदेव:, यमुनातीरे कालिन्दीतटे, अन्नं भोजनं, बुभुजे अभुञ्जत्। (अत्रान्तरे) वत्सा: गोवत्सा:, दूरतरं बहुदूरं विप्रकृष्टान्तरं वा, गता: ययु:।

यदा नदीतीरे श्रीकृष्ण: भोजनं करोति स्म, तदा तदलक्षतया गोवत्सा: विप्रकृष्टान्तरिता बभूवुरिति भाव:।

**भाषार्थ:**- एक दिन कमल नयन शिशु श्रीकृष्ण यमुना के तट पर भोजन कर रहे थे कि इतने में बछड़े चरते हुए उन से दूर चले गये।

**आनयिष्यामि वत्सान् वो भुञ्जीतान्नं यथारुचि।**
**नापश्यत्तत्र गत्वा तान् परावृत्त्य न बालकान् ।। 71।।**

**अन्वयः**- वः वत्सान् आनयिष्यामि, (यूयं) यथारुचि अन्नं भुञ्जीत। तत्र गत्वा तान् (वत्सान्) न अपश्यत्। परावृत्त्य बालकान् (अपि) न (अपश्यत्)।

**संस्कृतव्याख्या**- श्रीकृष्ण : गोपालबालकेभ्य आश्वासयामास यत्, वः युष्माकं, वत्सान् वात्सकान्, आनयिष्यामि आवक्ष्यामि। (यूयं) यथारुचि स्वाभिलाषानुसारं यथेच्छं वा, अन्नं भोजनं, भुञ्जीत खादत। तत्र दूरं गत्वा संप्राप्य, तान् वत्सान् न नहि, अपश्यत् ददर्श, परावृत्त्य प्रत्यागत्य, बालकान् गोपदारकान्। (अपि) नापश्यत् नैव दृष्टवान्।

गोपालबालकान् बोधयित्वा श्रीकृष्णः वत्सानामन्वेषणार्थं गतवान्, परन्तु तेन भगवता वत्सास्तत्र नैव दृष्टाः, परावर्त्तनात्परं बालका अपि नैव दृष्टा इति भावः।

**भाषार्थः**- श्रीकृष्ण ने गोपबालकों को समझाते हुए कहा कि, हे मित्रो! तुम लोग अपनी इच्छानुसार भोजन करो। यह कह कर श्रीकृष्ण ने दूर जा कर गाय एवं बछडों को ढूंढ़ा। परन्तु उन्हें वे दिखाई नहीं दिये। लौटकर देखा कि वे सारे बालक भी नहीं है।

**क्षणं ध्यात्वाऽगमत्तावद् ब्रह्मकर्मेति माधवः।**
**तत्तदाकारतां यातो यतः सर्वमयो हरिः ।। 72।।**

**अन्वयः**- माधवः क्षणं ध्यात्वा बह्मकर्म इति तावत् अगमत्। ततः सः तत्तदाकारतां यातः। यतः हरिः सर्वमय (एवास्ति)।

**संस्कृतव्याख्या**- माधवः केशवः, ''दामोदरोः हृषीकेशः केशवः माधवो स्वभूः'' इत्यमरः। क्षणं मुहूर्त्तं, ध्यात्वा एकाग्रबुद्ध्या विचिन्त्य, ब्रह्मकर्म ब्रह्मणः विधातुः कर्म कार्यम्, इति एवं तावत् अगमत् अबुध्यत। (ततः सः) तत्तदाकारतां तत्तद्बालकानाम् आकारतां स्वरूपतां, यातः प्राप्तः। यतः यस्मात्कारणात्, हरिः विष्णुः, सर्वमयः सकलजीवान्तर्गत, एव अस्ति।

परावर्त्तनात्परं स्वमित्राणि बालकान् अदृष्ट्वा श्रीकृष्णः ध्यानेन ज्ञातवान् यद् ब्रह्मणा एव एतदाचरितमिति, परिणामतस्तेन माधवेन सकलबालकेषु आत्मस्वरूपं धारितमिति भावः।

**भाषार्थः**- जब पल भर में ध्यान के द्वारा श्रीकृष्ण को पता चला कि, ब्रह्माजी ने ही बालकों का अपहरण किया है, तब उन्होंने सभी गोपबालकों में अपना रूपधारण कर लिया, क्योंकि भगवान् विष्णु सभी प्राणी के अन्दर बिराजते है।

**विरञ्चिरागतस्तत्र व्यतीते हायने पुनः ।**
**अपश्यद्वीतविज्ञानो हरिमेकमनेकधा।।73।।**

**अन्वयः**- हायने व्यतीते तत्र पुनः विरञ्चि आगतः। वीतविज्ञानः (सः) एकं हरिम् अनेकधा अपश्यत्।

**संस्कृतव्याख्या**- हायने संवत्सरे, ''संवत्सरो वत्सरोऽब्दो हायनोऽस्त्री शरत्समाः'' इत्यमरः। व्यतीते गते, तत्र यमुनातटे, पुनः विरञ्चिः ब्रह्मा, आगतः आययौ, वीतविज्ञानः वीतं विज्ञानं यस्य सः परमार्थज्ञानरहितः सन्नित्यर्थः, (स ब्रह्मा) एकम् अद्वितीयं, हरिं श्रीकृष्णम्, अनेकधा बहुधा, अपश्यत् ददर्श।

संवत्सरात्परं तत्र यमुनातटे ब्रह्मा आगत्य एकमेव श्रीकृष्णं बहुधा दृष्ट्वा आश्चर्यचकितः संजात इति भावः।

**भाषार्थः**- एक साल बीत जाने पर विघाता यमुना के तट पर उपस्थित हुए, तत्त्वज्ञान के अभाव के कारण उन्होंने एक ही श्रीकृष्ण को अनेक शरीरों में देखा।

**दण्डवत्पतितो भूमावस्तु पूर्णेक्षणो विधिः ।**
**नापश्यत्तद्द्वितीयं तु बद्धाञ्जलिपुटोऽभवत् ।।74।।**

**अन्वयः**- अस्तु। पूर्णेक्षणः विधिः भूमौ दण्डवत् पतितः, तद्द्वितीयं तु नापश्यत्। (ततः सः) बद्धाञ्जलिपुटः अभवत्।

**संस्कृतव्याख्या**- अस्तु भवतु, पूर्णेक्षणः पूर्णे पूरिते इक्षणे नेत्रे यस्य सः, सफलदर्शन इत्यर्थः। विधिः ब्रह्मा, भूमौ भुवि, दण्डवत् साष्टाङ्गप्रणिपातपूर्वकम्, पतितः शयितः। तद्द्वितीयं तस्मात् श्रीकृष्णात् द्वितीयम् अपरं, तु न नहि, अपश्यत् दृष्टवान् । (ततः सः) बद्धाञ्जलिपुटः करबद्धपूर्वकावस्थितः, अभवत् संजातः।

जगत्स्रष्टा ब्रह्मा श्रीकृष्णस्य समक्षं भूमौ प्रणिपत्य तदतिरिक्तं कमप्यनवलोक्य करबद्धपूर्वकमतिष्ठदिति भावः।

**भाषार्थः**- सर्वद्रष्टा ब्रह्माजी ने श्रीकृष्ण के समक्ष जमीन पर साष्टाङ्ग प्रणिपात किया। परन्तु उन्होंने ने श्रीकृष्ण के अतिरिक्त दूसरे किसी को भी नहीं देखा। उस के बाद वे हाथ जोड़कर खड़े हो गये।

**नमस्तस्मै नमस्तस्मै येनाहं रचितः पुरा ।**
**नाभिकञ्जाद्विधिर्नाम्ना जगत्कर्त्रेत्यहङ्कृतिः ।।**

**त्वमेव जगतामीशः प्रभुस्त्वतः परं नहि।**
**सर्वं खल्विदं ब्रह्म त्वमेवासि जगद्गुरो ।।**

**नमस्ते वासुदेवाय नमस्ते नन्दसूनवे।**
**नमो गोपीजनेशाय नमो हृत्तापहारिणे ।।**

75-77।। (त्रिभिः कुलकम्)

**अन्वयः**- जगत्कर्त्ता इति अहङ्कृतिः नाम्ना विधिः अहं पुरा (आत्मनः) नाभिकञ्जात् रचितः, तस्मै नमः तस्मै नमः। हे जगद्गुरो ! त्वमेव जगताम् ईशः प्रभुः (चासि),त्वत्तः परं (कोऽपि) नहि (अस्ति)। त्वमेव सर्वं खलु इदं ब्रह्म असि। वासुदेवाय ते नमः, नन्दसूनवे ते नमः। गोपीजनेशाय नमः। हृत्तापहारिणे नमः। इति।

**संस्कृतव्याख्या**- जगत्कर्त्ता जगतः संसाररस्य कर्त्ता नाम रचयिता इति कृत्वा, अहङ्कृतिः अहङ्कारस्वरूपकः, नाम्ना संज्ञया, विधिः विधाता, ''विधाता विश्वसृग्विधिः'' इत्यमरः। अहं ब्रह्मा, पुरा पूर्वं, येन भगवता विष्णुना,

(आत्मनः) नाभिकञ्जात् नाभिकमलात्, रचितः निर्मितोऽस्मि। तस्मै श्रीकृष्णाय विष्णुस्वरूपिणे, नमः प्रणामः, तस्मै नमः, हे भो, जगद्गुरो जगतः संसारस्य गुरुः उपदेष्टा तत्सम्बोधने, त्वमेव भवान् एव, जगतां संसारवासिनां सर्वेषां प्राणिनाम्, ईशः स्वामी, प्रभुः नियन्ता, चासि। त्वत्तः भवतः, परं श्रेष्ठः, कोऽपि नहि नैव, अस्ति। त्वमेव भवान् एव, सर्वं समस्तं, खलु निश्चितात्म-कमव्ययपदमिदं, ब्रह्म परमात्मा, असि तिष्ठसि। वासुदेवाय वसुदेवसुताय श्रीकृष्णाय, ते भवते, नमः नमांसि। गोपीजनेशाय गोपीजनानां गोपाङ्गनानाम् ईशः स्वामी यः तस्मै नमः नमांसि। हृत्तापहारिणे हृतः हृदयस्य तापं पीडां हरते दूरीकरोति यः तस्मै, नमः नमांसि। वेदान्तगतं दर्शनमत्र निहितमस्ति।

सृष्टिकर्ता विधाता स्वोत्पत्तिहेतुकं श्रीकृष्णं विनम्रतया पौनःपुन्येन नमश्चकारेति भावः।

**भाषार्थः**- हाथ जोड़कर स्तुति करते हुए ब्रह्माजी ने कहा कि, जगत् का रचयिता हूँ इस प्रकार अहंकार जिस में निहित है, और विधि जिस का नाम है, ऐसा मैं जिस विष्णुरूपी श्रीकृष्ण के द्वारा पूर्व में उन के नाभि कमल से रचा गया हूँ। उसी भगवान् वासुदेव को मेरा प्रणाम । हे जगन्नाथ ! आप ही जगत् के मालिक हैं। आप से बढ़कर कोई भी नहीं है, आप ही इस सम्पूर्ण ब्रह्माण्ड में ब्रह्म स्वरूप में व्याप्त हैं। हे वासुदेव कृष्ण! आप को मेरा नमस्कार। हे नन्दबाबा के पुत्र। आप को मेरा नमस्कार, हे गोपीजनवल्लभ! आपको मेरा नमस्कार। हे हृदय के सकल ताप को हरने वाले माधव! आप को मेरा नमस्कार।

**इति स्तुवन्तं ब्रह्माणमाहासौ जगदीश्वरः।**
**जाने ते हृद्गतं ब्रह्मन् गच्छ धाम स्वकीयकम् ।। 78।।**

**अन्वयः**- इति स्तुवन्तं ब्रह्माणम् असौ जगदीश्वरः आह- (हे) ब्रह्मन् ! ते हृद्गतं (भावं) जाने। (त्वं) स्वकीयकं धाम गच्छ।

**संस्कृतव्याख्या**- इति एवं प्रकारेण, स्तुवन्तं शंसन्तं, ब्रह्माणं विधातारं, असौ अयं, जगदीश्वरः परमपुरुषः श्रीकृष्णः, आह उवाच,-हे ब्रह्मन्

कमलासन!, ते तव, हृदयगतम् अन्तःकरणस्थं, भावमहं जाने जानामि। त्वं भवान्, स्वकीयकम् आत्मीयं, धाम निवासस्थानं, गच्छ याहि।

स्तुवन्तं विधिं बोधयित्वा एव श्रीकृष्णः तद्धाम प्रेषयामासेति भावः।

**भाषार्थः**- इस प्रकार स्तुति करने वाले ब्रह्माजी से श्रीकृष्ण ने कहा कि, हे ब्रह्मन्! मैं आप के दिल की भावना को समझता हूँ। अतः आप अपने धाम ब्रह्मलोक पधारे।

**प्रणम्य स गतो ब्रह्मा कृष्णस्य चरितं स्मरन् ।**
**परमानन्दमग्नः सन् विस्मृत्य स्वमपि स्वयम् ।। 79।।**

**अन्वयः**- स ब्रह्मा स्वयं स्वमपि विस्मृत्य कृष्णस्य चरितं स्मरन् परमानन्दमग्नः सन् प्रणम्य गतः।

**संस्कृतव्याख्या**- स पूर्वोक्तः श्रीकृष्णस्याराधयिता, ब्रह्मा विधाता, स्वयम् आत्मनैव, स्वमपि आत्मानमपि, विस्मृत्य मनसि अस्वीकृत्य, कृष्णस्य वासुदेवस्य, चरितं गुणग्रामजातं, स्मरन् ध्यायन्, परमानन्दमग्नः परमानन्दे परब्रह्मणि मग्नः तल्लीनः सन्, प्रणम्य श्रीकृष्णं नमस्कृत्य, गतः यातः।

सृष्टिकर्त्ता ब्रह्मा श्रीकृष्णस्य चारित्रिकवैशिष्ट्यमननपुरस्सरमात्मानं विस्मृत्य एव सानन्दं स्वधाम प्रति जगामेति भावः।

**भाषार्थः**- उस ब्रह्माजी ने अपने आप को भूलकर श्रीकृष्ण का चरित्र स्मरण करते हुए परमानन्दमग्न हो कर प्रणाम कर अपने धाम की ओर गमन किया।

**बाला वत्साश्च सर्वे ते पूर्ववद् गृहमागताः ।**
**अघं स्मरन्तः स्वानूचुः कृष्णेनाचरितं महत् ।। 80।।**

**अन्वयः**- बालाः वत्साश्च ते सर्वे पूर्ववद् गृहम् आगताः। अघं स्मरन्तः (ते) कृष्णेन (यत्) महत् आचरितं (तत्) स्वान् ऊचुः।

**संस्कृतव्याख्या**- बालाः गोपबालकाः, सकलाः, वत्साश्च गावश्च, ते सर्वे ते पूर्ववत् प्राग्वद्, गृहमागताः स्वनिवासस्थानं प्रत्यागताः। अघम् एतन्नामधेयं दैत्यं, स्मरन्तः ध्यायन्तः, ते, कृष्णेन वासुदेवेन, यत् महत् गुरुत्वपूर्णं कार्यम्, आचरितं सम्पादितम्, तत्सर्वं स्वान् आत्मीयान्, ऊचुः कथयामासुः।

गोपालबालकाः वत्सैः सह गृहं परावृत्त्य कृष्णस्य गौरवशालि कृत्यजातं स्वकीयजनान् श्रावितवन्त इति भावः।

**भाषार्थः**- ग्वालों के बच्चे और बछड़े सभी के सब पहले की तरह अपने घर लौट आये। अघासुर को याद करते हुए उन्होंने श्रीकृष्ण के द्वारा सम्पादित अलौकिक कृत्यों का वर्णन अपनों के समक्ष किया।

**शरत्कालोदिते चन्द्रे पूर्णे पुलिनमाश्रितः।**
**वंशीमवादयत् कृष्णः सप्तस्वरविभूषिताम् ।। 81।।**

**अन्वयः**- शरत्कालोदिते पूर्णे चन्द्रे पुलिनम् आश्रितः कृष्णः सप्तस्वरविभूषितां वंशीम् अवादयत्।

**संस्कृतव्याख्या**- शरत्कालोदिते शरत्काले आश्विनकार्त्तिकाभ्यामृतौ उदिते आविर्भूते प्रकटिते वा, पूर्णे चन्द्रे षोडशकलात्मके विधौ, शरत्पूर्णिमायामित्यर्थः। पुलिनं जलोत्थितं तटप्रदेशं, ''तोयोत्थितं तत्पुलिनम्'' इत्यमरः आश्रितः अवस्थितः, कृष्णः वासुदेवः, सप्तस्वरविभूषितां ऋषभादिभिः सप्तसंख्यकैः स्वरैरलंकृतां, वंशीं वेणुम्, अवादयत् अगायत।

शरत्पूर्णिमाया रात्रावेव श्रीकृष्णः यमुनायाः तटप्रदेशमारुह्य सप्तस्वरसमन्वितं वेणुं नादयामासेति भावः।

भाषार्थः- शरद् की रात में पूनम के चांद निकलने पर श्रीकृष्ण ने यमुना के तट पर बैठ कर सात स्वरों से युक्त वंशी का वादन किया।

**गोप्यस्तद्ध्वनिमाकर्ण्य जग्मुर्वारिप्रवाहवत्।**
**गृहकार्येऽपि शक्तास्ताः तत्परित्यच्य सत्वराः।। 82।।**

**अन्वयः**- तद्ध्वनिम् आकर्ण्य गृहकार्येऽपि शक्ताः ताः गोप्यः तत्परित्यच्य वारिप्रवाहवत् सत्वराः जग्मुः।

**संस्कृतव्याख्या**- तद्ध्वनिं तस्याः मुरल्याः ध्वनिं नादम्, आकर्ण्य श्रुत्वा, गृहकार्येऽपि सद्मकर्मण्यपि, शक्ताः लिप्ताः, ताः गोप्यः गोपाङ्गनाः, तत्परित्यच्य तद्गृहकार्यजातं अपहाय, वारिप्रवाहवत् जलस्रोतसः गतिरिव, सत्वराः त्वरया शीघ्रतया सह वर्त्तमानाः, द्रुतमित्यर्थः, जग्मुः ययुः।

गृहकर्मसंपृक्ताः गोपाङ्गनाः श्रीकृष्णनिनादितवंशीध्वनिं श्रुत्वा तत्कालमेव तत्सर्वं परित्यच्य सत्वरमेव नद्यास्तटं ययुरिति भावः।

**भाषार्थः**- गोपबालाएं श्रीकृष्ण के द्वारा बजाई गई वंशी की आवाज सुन कर अपने घर के काम काज छोड़कर पानी के बहाव की तरह तेज गति से नदी के तट पर जा पहुँची।

**भुवं* लिखन्त्यः तस्थुस्ताः पादाङ्गुष्ठनखेन ताम्।**
**चकिताः सस्मितास्तूष्णीं कृष्णो नः किं नु वक्ष्यति।।**

**निरीक्ष्याग्रे स्थिता बाला हरिराह हसन्पुनः।**
**किमर्थमागता यूयं घोरेऽस्मिन् विपिने निशि।।**

**स्त्रीणां वै विधिना प्रोक्तः एष धर्मः सनातनः।**
**पतिरेव सदा सेव्यो मनोवाक्कायकर्मभिः।।**

**तस्मात् प्रयात सदनं स्वं स्वमेवाचिरं पुनः।**
**आत्मारामोऽस्म्यहं बाला न प्रियो नाप्रियो परः।। 83-86।।**

**अन्वयः**- चकिताः सस्मिताः ताः पादाङ्गुष्ठेन तां भुवं लिखन्त्यः तूष्णीं तस्थुः। कृष्णः नः किं नु वक्ष्यति (इति) अग्रे निरीक्ष्य बालाः स्थिताः। हरिः पुनः हसन् आह-यूयं अस्मिन् घोरे विपिने निशि किमर्थम् आगताः ? स्त्रीणां वै विधिना एव सनातनः धर्मः प्रोक्तः (यत्) मनोवाक्कायकर्मभिः पतिरेव सदा सेव्यः। तस्मात् स्वं स्वं सदनं पुनः अचिरं प्रयात। (हे) बालाः ! अहम् आत्मारामोऽस्मि। न (मे) परः, प्रियः न अप्रियः (अस्ति)।

**संस्कृतव्याख्या**- चकिता: किंकर्त्तव्यविमूढा:, सस्मिता: मन्दहासयुता:, ता: गोप्य:, पादाङ्गुष्ठेन चरणाग्रजेन, तां भुवं नद्या: तटप्रदेशान्वितां धरित्रीं, लिखन्त्य: रचयन्त्य:, तूष्णीं नीरवं, तस्थु: आसु:। अपि च कृष्ण: वासुदेव:, न: अस्मान्, किं नु कीदृशं वच:, वक्ष्यति कथयिष्यति, (इति) अग्रे पुरत:, निरीक्ष्य अवलोक्य, बाला: युवत्य:, स्थिता: तस्थु:। हरि: श्रीकृष्ण:, पुन: पुनश्च, हसन् स्मितं कुर्वन्, आह अवदत् यूयं भवत्य:, अस्मिन् एतस्मिन्, घोरे भयङ्करे, विपिने अरण्ये, निशि रात्रौ, किमर्थं किं निमित्तम्, आगता आयाता:। स्त्रीणां नारीणां, वै ननु, विधिना विधात्रा, एव अयं, सनातन: शाश्वत:, धर्म: कर्त्तव्याकर्त्तव्यविवेक:, प्रोक्त: अभिहित: (यत्) मनोवाक्कायकर्मभि: मनसा मानसिकव्यापारेण वाचा वचनेन कायेन शरीरेण कर्मणा कर्त्तव्यसम्पादनेन चेत्येतै:, पतिरेव स्वामी एव, सदा नित्यं, सेव्य: सेवनीय:। तस्मात् तत एव कारणात्, स्वं स्वं निजकीयं, सदनं गृहं, पुन: पुनरेव, अचिरं शीघ्रमेव, प्रयात प्रत्यावर्त्तध्वम्। हे बाला: ! भो युवत्य: ! अहं वासुदेव:, आत्माराम: स्वाधीनचेता: आत्मनिष्ठतुष्टो वा, अस्मि। न नहि (मे) प्रिय: आत्मीय: पर: परकीयोऽस्ति, न नहि (पर:) अप्रिय: शत्रु अस्ति।

नद्यास्तटे यदा गोपाङ्गना: श्रीकृष्णस्य समक्षं चकितचकिता: बभूवु:, तदा श्रीकृष्ण ता: प्रति ऊचु: यत्, भवतीनामत्रागमनं सर्वथाऽनुचितम्। यतो हि पतिसेवा एव स्त्रीणां सर्वश्रेष्ठ: धर्म:। अत: यूयं सर्वा: स्वस्वगृहं प्रयाथ, अहन्त्वात्मतुष्टोऽस्मि, न मे कश्चित्प्रिय:, न च मे कश्चिदप्रियश्चेति भाव:।

**भाषार्थ:**- जब गोपियां श्रीकृष्ण की वंशी ध्वनि सुन कर नदी के तट पर पहुँच कर चकित चकित हो गई और उनके मुंह से कोई वाणी न निकली, सिर्फ श्रीकृष्ण की ओर ताकने लगी, तब श्रीकृष्ण ने मुस्कराते हुए उन्हें कहा कि, तुम लोग इस घोर जंगल में क्यों आई हो ? विधाता ने बताया है कि कायमनोवाक्य व कर्मों से पति की सेवा करना ही पत्नियों का सर्वोच्च धर्म है। इस लिये तुम सब अपने-अपने घर अतिशीघ्र वापस लौट जाओ। हे युवतियो! मैं तो अपने आप में रमने वाला हूँ। न मेरा कोई प्रिय है, न कोई शत्रु है। अर्थात् मेरे लिये सभी बराबर हैं।

*मूलपुस्तके ''भुव'' इति पदं लिखितं वर्त्तते, परन्तु ''भुवं'' इति पाठः साधीयान् स्यात्।

**अश्रुमुख्योऽभवन् सर्वाः कृष्णवाक्श्रवणान्तरम्।**
**शरणागतदीनानां रक्षकोऽसि न चापरः ।।**

**त्वं पतिस्त्वं गतिः साक्षात्पतेरपि पतिर्भवान् ।**
**किमर्थमागता यूयं नैव वाच्यं त्वया विभो ।। 87-88।।**

**अन्वयः**- कृष्णवाक्श्रवणान्तरं (ताः) सर्वाः अश्रुमुख्यः अभवन्। शरणागतदीनानां (त्वं) रक्षकोऽसि, न च अपरः। त्वं पतिः त्वं गतिः (असि) भवान् साक्षात् पतेरपि पतिः (अस्ति)। हे विभो ! यूयं किमर्थम् आगताः (इति) त्वया (एतत्) नैव वाच्यम्।

**संस्कृतव्याख्या**- कृष्णवाक्श्रवणान्तरम् उपर्युक्तप्रकारेण कृष्णस्य वासुदेवस्य वाक्श्रवणान्तरं वाणीश्रुतिगोचरात्परं, ताः सर्वाः गोप्यः, अश्रुमुख्यः अभवन् चक्रन्दुः। (उक्तं च ताभिः यत्-) शरणागतदीनानां भवच्छरणाधिगतानां दरिद्राणां, (त्वं) रक्षकोऽसि त्राताऽसि। न च नैव , अपरः अन्यः कश्चन। त्वं पतिः स्वामी, त्वं भवान्, गतिः गन्तव्योऽसि। भवान् त्वं साक्षात् मूर्तिमान्, पतेरपि स्वामिनोऽपि, पतिः स्वामी, (अस्ति)। हे विभो ! भो विराट्पुरुष!, यूयं भवत्यः किमर्थं किं निमित्तम्, आगताः सम्प्राप्ताः (इति) त्वया भवता, (एतत्) नैव नहि, वाच्यं कथनीयम् । इति।

श्रीकृष्णस्य प्रतिषेधात्मकं वचः श्रुत्वा गोपाङ्गनाः रुदत्यः ऊचुः यत्, त्वन्तु शरण-रक्षकोऽसि, अपि च त्वमस्माकं पतिर्मुक्तिदश्चासि। त्वन्तु नः पतेरपि पतिरसि। हे प्रभो भवता तु अस्माकमागमनकारणं नितरां नैव प्रष्टव्यमिति भावः।

**भाषार्थः**- श्रीकृष्ण के वचन सुनकर सभी गोपियां रोने लगी, और उन्होंने श्रीकृष्ण से कहा कि, शरणागतों के तो आप रक्षक है। आप के अलावा और कोई है ही नहीं। आप ही हमारे पति हैं और गति भी हैं! आप तो

हमारे पति के भी पति हैं। हे प्रभो! आप को यह नहीं कहना चाहिये कि, तुम लोग यहां क्यों आई हो।

**इति तासां वचः श्रुत्वा रहस्यार्थं मनो दधे।**
**सुधाकरः शरच्छत्रः व्योममध्ये स्थितोऽभवत् ।।८९।।**

**अन्वयः**- इति तासां वचः श्रुत्वा (श्रीकृष्णः) रहस्यार्थं मनः दधे । व्योममध्ये शरच्छत्रः सुधाकरः स्थित अभवत्।

**संस्कृतव्याख्या**- इति एवं, तासां गोपाङ्गनानां, वचः वचनं, श्रुत्वा आकर्ण्य, (श्रीकृष्णः) रहस्यार्थं रहस्यपूर्णः गूढात्मकः अर्थः भावः यस्मिन् तत्, एवंभूतं मनः दधे अचिन्तयत्। व्योममध्ये गगनतले, शरच्छत्रः शरद्ऋतोः छत्रम् इव आतपत्रमिव आचरति यः सः, सुधाकरः निशाकरः, स्थितोऽभवत् प्रकटितोऽभूत्।

गोपाङ्गनानां वचः निशम्य श्रीकृष्णेन गूढं यच्चिन्तितं, तत्परिणामस्वरूपं नभसि शरत्कालीनचन्द्रः शुशुभे इति भावः।

**भाषार्थः**- इस प्रकार उन गोपिकाओं की बात सुनकर श्रीकृष्ण मन ही मन रहस्यात्मक तथ्य सोचने लगे। जिस से आकाश सुशोभित होने लगा।

**काश्चिद् वाद्यपरा गोप्यो गायिकाश्च तथाऽपराः।**
**ततः प्रवृत्त आरम्भो रासस्य यमुनातटे ।।९०।।**

**अन्वयः**- काश्चिद् गोप्यः वाद्यपराः तथा च अपराः गायिकाः (बभूवुः)। ततः यमुनातटे रासस्य आरम्भः प्रवृत्तः ।

**संस्कृतव्याख्या**- काश्चित् आगतासु गोपाङ्गनासु काश्चन, गोप्यः गोपबालाः, वाद्यपराः वाद्ययन्त्रवादनकर्मणि तत्पराः, तथा अपि च, अपरा अन्याः, गायिकाः गीतगायनकर्मसम्पृक्ताः, (बभूवुः), ततः तदनन्तरं, यमुनातटे यमुनायाः कालिन्द्याः तटे तीरे, रासस्य रासलीलायाः, आरम्भः प्रारम्भः, प्रवृत्तः सञ्जातः।

तत्र समुपागतासु गोपललनासु काश्चन वाद्ययन्त्राणि नादयामासु:, काश्चन अपरा: गीतं जगु:, तदेवं यमुनानद्यास्तटप्रदेशे रासलीला प्रारब्धेति भाव:।

**भाषार्थ:**- वहां कुछ गोपिकाओं ने वाद्ययन्त्र बजाना प्रारम्भ कर दिया तो कुछ ललनाओं ने गीत गाना प्रारम्भ कर दिया। इस प्रकार यमुना नदी के तट पर रासलीला प्रारम्भ हो गई।

**अन्योन्यं बद्धबाहुभ्यां गोपीनां च द्वयोर्द्वयो: ।**
**मध्यगोऽभूद्धरि: साक्षाद् हेम्नां नीलमणिर्यथा ।।91।।**

**अन्वय:**- यथा हेम्नां मध्यग: साक्षात् नीलमणि: (तथा) हरि: अन्योन्यं बद्धबाहुभ्यां गोपीनां च द्वयो: द्वयो: मध्यग: अभूत्।

**संस्कृतव्याख्या**- यथा यथैव, हेम्नां सुवर्णानां, मध्यग: मध्यवर्त्ती, साक्षात् मूर्त्तिमान्, नीलमणि इन्द्रनीलमणि: (शोभते) (तथा) हरि: श्रीकृष्ण:, अन्योन्यं परस्परं, बद्धबाहुभ्यां निबिडितभुजाभ्यां, गोपीनां गोपाङ्गनानां च, द्वयो: द्वयो: युगलात्मकयो:, मध्यग: मध्यावस्थित:, अभूत् बभूव।

सुवर्णानामन्तर्यथा इन्द्रनीलमणि: शोभते, तथैव सुवर्णाभानां गौरवर्णानां गोपाङ्गनानां मध्यवर्त्ती श्यामवर्णी श्रीकृष्ण: शुशुभे इति भाव:।

पद्येऽस्मिन्नुपमानोपमेयभावेनोपमालंकार: संगच्छते, अपि च ''साक्षात्'' पदसहकृतबलादुत्प्रेक्षाऽपि लब्धसत्ताका।

**भाषार्थ:**- जिस प्रकार सोने के मध्य इन्द्रनील मणि सुशोभित होता है, उसी प्रकार तप्तकनकाभ गौरवर्णा गोपिकाओं के मध्य श्याम रंगवाले श्रीकृष्ण सुशोभित होने लगे।

**थेई थेई तिथेईति तत्तथेईति तत्तथा।**
**धिकटध्धिकटध्धिध्धिध्धिकटध्धिकटध्वनि: ।।**

**अभवत् परतस्तत्र हरिर्गी*तमगायत।**
**गोप्यो जगुश्च ननृतुस्तालैक्येन परस्परम्।।92-93।।**

**अन्वयः**- थेई थेई तिथेई इति तत् तत् थेई इति तत् तथा धिकटत् धिकटत् धित् धित् धिकटत् धिकटध्वनिः अभवत्। तत्र परतः हरिः गीतम् अगायत। गोप्यः जगुः, तालैक्येन परस्परं ननृतुः च।

**संस्कृतव्याख्या**- थेई थेई तिथेई इति एवं प्रकारः नृत्यतालविशेषः, तत् तत् थेई इति एवंप्रकारकः तालविशेषोऽपि, तत्तथा तत्तथैव च, धिकटत् धिकटत् धित् धित् धिकटत् धिकटध्वनिः इति शब्दविशेषः अभवत् अभूत्। तत्र गोपीनां सामूहिकनृत्यसंविधाने, परतः अग्रे, हरिः श्रीकृष्णः, गीतं भजनम्, अगायत गीतवान्। गोप्यः गोपाङ्गनाः, परस्परं मिथः, तालैक्येन तालसाम्येन, ननृतुः नृत्यं चक्रुः, जगुश्च गायनं च चक्रुः।

श्रीकृष्णमग्रतो विधाय गोप्यः परस्परं थेई थेई इति तालविशेषानवलम्ब्य ननृतुः गीतं च जगुश्चेति भावः।

**भाषार्थः**- थेई थेई, तिथेई-तिथेई इस प्रकार के ताल विशेष के साथ धिकटत्-धिकटत् इस प्रकार के आवाज निकली, गोपियों ने श्रीकृष्ण को बीच में रख कर नृत्य किया, गीत भी गाया।

*''हरिगीतमगायत'' इति पाठः मूले विद्यते, परन्तु ''हरिर्गीतमगायत'' इति पाठः साधीयान्।

**बालानां निष्ककण्ठीनां नृत्यन्तीनां विशेषतः।**
**स्वकीयपाणिना कृष्णः स्वेदविन्दूनमीमृजत्।। 94।।**

**अन्वयः**- नृत्यन्तीनां बालानां विशेषतः निष्ककण्ठीनां स्वेदविन्दून् कृष्णः स्वकीयपाणिना अमीमृजत्।

**संस्कृतव्याख्या**- नृत्यन्तीनां नृत्यं कुर्वतीनां, बालानां तरुणीनां, विशेषतः विशेषरूपेण, निष्ककण्ठीनां निष्कः नाम सुवर्णाभूषणं कण्ठे यासां ताः निष्ककण्ठ्यः तासां, ''साष्टे शते सुवर्णानां हेम्न्युरोभूषणे पले। दीनारेऽपि च निष्कोऽस्त्री'' इत्यमरः। स्वेदविन्दून् घर्मकणान्, ''घर्मो निदाघः स्वेदः

स्यात्'' इत्यमरः। कृष्णः वासुदेवः स्वकीयपाणिना स्वकराग्रेण, अमीमृजत् अमार्जीत्। (मृज्+लुङ्+प्र.पु.+एकवचने)।

नृत्यन्तीनां गोपाङ्गनानां स्वेदकणान् स्वयं श्रीकृष्ण एव स्वहस्तेन मार्जयांचकारेति भावः।

**भाषार्थः**- नाचती हुई गोपिकाओं के विशेष रूप से गले में सोने का हार धारण करने वाली बालाओं के पसीनों के बून्दों को श्रीकृष्ण ने अपने हाथों से ही पोंछा।

**यमुनाकूलमाश्रित्य रेमे ताभिः समं प्रभुः ।**
**एकाऽवदत् विभुं तासां न गन्तुं शक्यते मया ।।**

**स्कन्धमारुह्य कान्ते त्वां नयामि चपलोपमाम् ।**
**गन्तुकामनया यत्र तत्रैवान्तरधीयत ।। 95-96 ।।**

**अन्वयः**- प्रभुः यमुनाकूलम् आश्रित्य ताभिः समं रेमे। तासाम् एका विभुम् अवदत् (यत्) मया गन्तुं न शक्यते। (श्रीकृष्णोऽवदत्) (हे) कान्ते ! चपलोपमां त्वां स्कन्धम् आरुह्य नयामि। (सा) गन्तुकामनया यत्र (प्राप्तवती) तत्रैव (कृष्णः) अन्तरधीयत।

**संस्कृतव्याख्या**- प्रभुः वासुदेवः, यमुनाकूलं यमुनायाः कालिन्द्याः कूलं तटम्, ''कालिन्दी सूर्यतनया यमुना शमनस्वसा'' इत्यमरः। आश्रित्य अवलम्ब्य, ताभिः गोपाङ्गनाभिः, समं सह, रेमे रमणं चकार। तासां ब्रजाङ्गनानाम्, एका अन्यतमा, विभुं प्रभुम्, अवदत् अकथयत् (यत्) मया कयाचिद्गोपाङ्गनया, गन्तुं यातुं, न नहि, शक्यते पार्यते। श्रीकृष्णः तस्यै अवदत् हे कान्ते प्रियतमे। चपलोपमां चपलया विद्युता साकमुपमा साम्यं यस्या सा चपलोपमा तां, ''मीनेऽपि चपला तु स्यात्पिप्पल्यां विद्युति श्रियाम् पुंश्चल्याम्'' इति हैमः।। त्वां त्वा स्कन्धम् अंसम्, ''स्कन्धो भुजः शिरोंसोऽस्त्री'' इत्यमरः। आरुह्य आधाय, नयामि वहामि। सा गोपी गन्तुकामनया जिगमिषया, यत्र यस्मिन् स्थाने, प्राप्तवती। तत्रैव तस्मिन्नेव स्थाने, कृष्णः अन्तरधीयत अन्तर्दधौ।

यमुनायास्तटे श्रीकृष्णः गोपाङ्गनाभिः सह रमणं चकार, तास्वेका यदा चलितुं स्वस्यासामर्थ्यं प्रकटितवती, तदा श्रीकृष्णः ''त्वां मामकीने स्कन्धे धारयित्वा नयामी''ति तस्यै उक्त्वा क्वचिदन्तर्दधाविति भावः।

**भाषार्थः**- यमुना के तट पर ही भगवान् श्रीकृष्ण ने उन गोपाङ्गनाओं के साथ रमण किया। उन में से एक गोपिका ने प्रभु से कहा कि, मैं चलने में असमर्थ हूँ। श्रीकृष्ण ने उसे कहा कि, हे प्रिये! मैं तुम्हें मेरे कन्धे पर बैठा कर ले जाऊंगा। वह गोपिका जहां जाना चाहती थी, श्रीकृष्ण उस स्थान पर अन्तर्धान हो गये।

**अन्तर्हितं तमालोक्य कृष्णं ता गोपदारकाः।**
**उच्चैस्तरां तु रुरुदुः क्व गतो वनमध्यतः।। 97।।**

**अन्वयः**- वनमध्यतः क्व गतः (इति) अन्तर्हितं कृष्णम् आलोक्य ताः गोपदारकास्तु उच्चैस्तरां रुरुदुः।

**संस्कृतव्याख्या**- वनमध्यत अरण्यमध्यस्थलात्, क्व कुत्र, गतः पलायितः, (इति) अन्तर्हितम् अदृश्योपेतं, तं कृष्णं वासुदेवम्, आलोक्य दृष्ट्वा, ताः गोपदारकाः गोपाङ्गनास्तु, उच्चैस्तराम् उन्नतस्वरेण, रुरुदुः चक्रन्दुः।

अदृश्यरूपेणावस्थितं श्रीकृष्णं दृष्ट्वा गोपाङ्गनाः विलपितवत्य इति भावः।

**भाषार्थः**- जंगल के बीच में से श्रीकृष्ण कहीं चले गये, इस प्रकार अदृश्य हुए कृष्ण को न देख कर वे गोपिकाएं जोर-जोर से रोने लगी।

**वटतरुर्भवतीव भवान् पटुः**
**भवतरुस्तव नाम च गीयते।**
**हरिरसौ विषयीकृत एव ते**
**वद स कुत्र गतो न हि दृश्यते।।**

**चलदल त्वमसीव हरेस्तरुः**
**किमथवा हरिरेव च गीयसे।**
**परमकारुणिकस्य पदं गतः**
**स च हरिः क्व गतः क्व गतो वद।।**

**बकुलसालरसालकदाडिमाः**
**पनसनिम्बकदम्बकचम्पकाः।**
**कृतसमाधिवशीकृतमानसाः**
**स च हरिः क्व गतो विषयीकृतः।। 98-100।।**

**अन्वयः**- वटतरु इव भवान् पटुः (अस्ति)। तव नाम च भवतरुः (इति) गीयते। असौ हरिः ते विषयीकृत एव, वद स कुत्र गतः ? न हि दृश्यते। हरेस्तरुः चलदल इव त्वम् असि। किं च हरिरेव गीयसे। अथवा परमकारुणिकस्य पदं गतः स हरिः क्व गतः क्व गतः वद। वकुलसालर-सालकदाडिमाः पनसनिम्बकदम्बकचम्पकाः कृतसमाधिव-शीकृतमानसाः। स च हरिः क्व गतः (क्व) विषयीकृतः।।

**संस्कृतव्याख्या**- वटतरुः न्यग्रोधो वृक्षः, इव यथा स्यात्तथा, ''न्यग्रोधो बहुपाद्वटः'' इत्यमरः। भवान् त्वं पटुः दृढः दक्षो वा (अस्ति)। तव भवतः, नाम संज्ञा च, भवतरुः संसारवृक्ष इति एवं, गीयते श्रद्धापूर्वकं जप्यते। असौ अयं, हरिः श्रीकृष्णः, ते तव, विषयीकृतः दृष्टिपथम् आगत एव, वद कथय, स वासुदेवः, कुत्र क्व, गतः यातः, नहि नैव, दृश्यते परिलक्ष्यते, हरेः विष्णोः तरुः वृक्षः, चलदल इव अश्वत्थ इव, त्वम् भवान्, असि वर्त्तसे। किञ्च अपरञ्च, हरिरेव श्रीकृष्ण एव, गीयसे गानविषयीक्रियसे। अथवा उतो वा, परमकारुणिकस्य श्रेष्ठदयावतः, पदं गतः अवस्थितिमुपगतः, स हरिः विष्णुः, क्व गतः कुत्र पलायितः, क्व वा गतः यातः, वद ब्रूहि। वकुलसालर-सालकदाडिमाः वकुलाश्च केसराश्च सालाश्च अश्वकर्णकाश्च रसालकाश्च चूताश्च दाडिमाश्च करकाश्चेत्येते, ''अथ केसरोर्वकुलः'' इत्यमरः। ''साले तु सर्जकार्ष्याशिवकर्णका: सस्यसंवरः'' इत्यमरः।''आम्रश्चूतो रसालः'' इत्यमरः। ''समौ करकदाडिमौ'' इत्यमरः। पनसनिम्बकदम्बकचम्पकाः पनसश्च

कण्टकिफलश्च निम्बश्च अरिष्टश्च कदम्बकश्च नीपश्च चम्पकश्च हेमपुष्प-कश्चेत्येतेऽपि, ''अथ चाम्पेयश्चम्पको हेमपुष्पकः'' इत्यमरः। कृतसमाधिव-शीकृतमानसाः श्रीकृष्णस्य दर्शनाभावेन कृतः यः समाधिः मौनभावः तेन वशीकृतमानसः स्थिरीकृतहृदयः यैः ते। स च एवंभूतोऽसौ, हरिः वासुदेवः, क्व गतः कुत्र पलायितः, क्व विषयीकृतः परिलक्षितः।

श्रीकृष्णस्यादर्शनेन व्याकुलिताः गोपाङ्गनाः तमन्विष्यन्त्य चक्रन्दुरिति भावः।

उपर्युक्तेषु त्रिष्वेव पद्येषु द्रुतबिलम्बितं छन्दः संयोजितम्। एतल्लक्षणं यथा-

''द्रुतबिलम्बितमाह नभौ भरौ'' इति।

**भाषार्थः**- श्रीकृष्ण जी को न देखकर उन के वियोग में रोती हुई गोपिकाएं कहने लगी कि, हे कृष्ण! आप बरगद के पेड़ की तरह निपुण हैं । भवतरु के नाम से आप का गान किया जाता है। हे बरगद के पेड! आप ने श्रीकृष्ण को कहीं देखा है क्या? कहाँ गये? दिखाई नहीं दे रहे हैं। हे कृष्ण! आप अश्वत्थ वृक्ष जैसे हैं, परमदयालु आप कहाँ चले गये? आप के वियोग से दुःखी हो कर जंगल में अवस्थित केसर, साल, आम, दाड़िम्ब, पणस (कटहल), नीम, कदम्ब तथा चम्पा आदि पेड़ समाधिस्थ, जैसे शान्त हो गये हैं। हे कृष्ण आप कहाँ गये? कहाँ आपका दर्शन मिलेगा?

**विशेषः**- पद्य संख्या ११ में हरि अर्थात् श्रीकृष्ण को चलदल (अश्वत्थ वृक्ष) बताने में श्रीमद्भगवद्गीता के श्लोक ''उर्ध्वमूलमधःशाखम-श्वत्थं प्राहुरव्ययम्'' का दर्शन निहित है।

**एवं लपन्त्यो रुरुदुः हरिः प्रत्यक्षतां गतः।**
**काश्चित् पाणिं पदौ काश्चित् हृदयेऽधुर्मुदं गताः।। 101।।**

**अन्वयः**- एवं लपन्त्यः (गोपाङ्गनाः) रुरुदुः । हरिः (च) प्रत्यक्षतां गतः। काश्चित् पाणिं, काश्चित् पदौ अधुः (काश्चित् च) हृदये मुदं गताः।

**संस्कृतव्याख्या**- एवम् उपर्युक्तप्रकारेण, लपन्त्यः प्रलापं कुर्वत्यः गोपाङ्गनाः रुरुदुः चक्रन्दुः। (रुद्+लिट्+प्र.पु.+बहु.) तासां क्रन्दनेन द्रवीभूतहृदयः हरिः श्रीकृष्णः, प्रत्यक्षतां नेत्रगोचरतां, गतः प्राप्तः। तासु गोपिकासु काश्चित् काश्चन पाणिं हस्तं, काश्चित् पदौ चरणाम्बुजौ च, अधुः धारयामासुः। (धा+लुङ्+प्र.पु.+बहु.) काश्चित् च हृदये चेतसि, मुदं गताः प्रसन्नाः बभूवुः। पद्येऽस्मिन्ननुष्टुप्छन्दः।

उपर्युक्तप्रकारेण गोपबालानां क्रन्दनध्वनिमाकर्ण्य श्रीकृष्ण-स्तत्समक्षमाविर्भूतः। परिणामतः गोपिकाऽन्तर्मुमुदुरिति भावः।

**भाषार्थः**- इस प्रकार चिल्लाती हुई गोपिकाएं रोने लगी तो श्रीकृष्ण प्रकटित हो गये। श्रीकृष्ण को देख कर कुछ गोपिकाओं ने कृष्ण के हाथ पकड़ा तो कुछ एक ने पैर पकड़ा। दूसरों ने हृदय में ही आनन्द का अनुभव किया ।

**कृष्णेन सह कृतस्नानविहारास्ताः सरिज्जले।**
**गायन्त्यः कृष्णचरित गताः स्वं स्वं गृहं पुनः ।। 102।।**

**अन्वयः**- सरिज्जले कृष्णेन सह कृतस्नानविहाराः ताः कृष्णचरितं गायन्त्यः स्वं स्वं गृहं पुनः गताः।

**संस्कृतव्याख्या**- सरिज्जले सरितः नद्याः यमुनायाः जले पयसि, कृष्णेन वासुदेवेन सह, कृतस्नानविहाराः स्नानं च गात्रक्षालनं च विहारश्च जलक्रीडा च स्नानविहारौ कृतौ सम्पादितौ स्नानविहारौ याभिः ताः, ताः गोप्यः, कृष्णचरितं कृष्णस्य नन्दसुतस्य चरितं गुणगानजातं, गायन्त्यः स्तुवन्त्यः, स्वं स्वं नैजं, गृहं गेहं, पुनः गताः प्रयाताः। पद्येऽस्मिन्नपि अनुष्टुप्छन्दः।

**भाषार्थः**- यमुना नदी के जल में कृष्ण के साथ स्नान एवं विहार करने वाली गोपाङ्गनाओं ने श्रीकृष्ण के गुणगान करती हुई अपने-अपने घर पर प्रस्थान किया।

**यः पिबेत् सस्पृहं भक्त्या कृष्णलीलामृतं जनः।**
**वैकुण्ठलोकं गत्वा स रमते कृष्णसन्निधौ ।। 103।।**

**अन्वयः**– यः जनः भक्त्या सस्पृहं कृष्णलीलामृतं पिबेत्, सः वैकुण्ठलोकं गत्वा कृष्णसन्निधौ रमते।

**संस्कृतव्याख्या**– यः जनः मानवः, भक्त्या श्रद्धया, सस्पृहं साभिलाषं, कृष्णलीलामृतं कृष्णस्य वासुदेवस्य लीलामृतं लीला क्रीडा एव अमृतं सुधारसः तं, पिबेत् अश्नीयात्, सः जनः, वैकुण्ठलोकं विष्णुलोकं, गत्वा प्राप्य, कृष्णसन्निधौ वासुदेवस्य निकटे, रमते मोदते। पद्यमिदमप्यनुष्टुप्च्छन्दसा निबद्धम्।

यः मनुष्यः कृष्णलीलामृतम् इत्याख्यं काव्यं शृणोति पठति च तस्य मुक्तिर्जायते इति भावः।

**भाषार्थः**– जो मनुष्य भक्तिपूर्वक बड़े आग्रह से श्रीकृष्ण के लीलामृत का पान करता है, वह वैकुण्ठलोक में पहुँच कर कृष्ण के पास आनन्दातिरेक को प्राप्त करता है।

**श्रीप्रतापस्य नृपतेः न्यवसत् सुखसद्मनि।**
**श्रीरामस्वामिनो भर्त्ता गोवर्द्धनधरः प्रभुः।। 104।।**

**अन्वयः**– श्रीरामस्वामिनः भर्त्ता गोवर्द्धनधरः प्रभुः श्रीप्रतापस्य नृपतेः सुखसद्मनि न्यवसत्।

**संस्कृतव्याख्या**– श्रीरामस्वामिनः एतन्नामधेयस्य कृष्णभक्तस्य भोलानाथपूर्वजस्य साधोः, भर्त्ता स्वामी प्रभुर्वा, गोवर्धनधरः गोवर्धनपर्वतधारी, प्रभु ईश्वरः, वासुदेवः श्रीकृष्णः, श्रीप्रतापस्य एतन्नामधेयस्य, नृपतेः श्रीप्रतापस्य अष्टादशशतके लब्धसत्ताकस्य राज्ञः, सुखसद्मनि जयपुरावस्थितसुप्रसिद्ध-हवामहलस्यान्तःनिर्मिते श्रीगोवर्द्धननाथमन्दिरे, न्यवसत् वसतिं चकार।

वासुदेवः श्रीकृष्णः श्रीप्रतापनृपतिना संस्थापिते गोवर्धननाथमन्दिरे जयपुरनगरावस्थिते स्ववसतिं चकारेति भावः।

**भाषार्थः**- श्रीराम स्वामी के प्रभु गोवर्धन पर्वत के धारण कर्त्ता भगवान् श्रीकृष्ण ने श्रीप्रताप नृपति के महल में निवास किया।

स्वस्ति श्रीमत्कविभोलानाथस्य कृतौ श्री पूर्णेन्दुसंस्कृतटीकोपेतमनुपम-भाषानुवादसहितं श्रीकृष्णलीलामृतं समाप्तम्।